१७ णि शतसहस्रकोपिहतेकबंधोत्थानमुक्तं अयुतसंख्याकवीरवधेमहाहवेच एकोतिवीरःकबंधोभवतीतिशंभिद्विराज्ञियते तदाशांतिपर्वस्थः

सहस्रशतशद्बोयुतार्थतयाव्याख्येयः ६२ तूर्यलयाश्रितावाद्यानुसारिणःकबंधाश्छिन्नशिरसइतिपर्यायाभ्यांतेषा मतिबहुत्वमाह छिन्नशि

17 रसइतिस्वरूपाख्यानंवा कोवापुरेवंधआश्रयोयेषांतेकबंधाइतिछिन्नशिरसांविशेषणमित्यन्ये अथवाछिन्नशिरसोपिकबंधाःकंशिरोबध्नं

तीतिकबंधाःतेषांमायावित्वाच्छिन्नमपिशिरोलग्नंभवतीत्यर्थः अथवाछिन्नंशिरोयेःकबंधैरन्येषांशिरश्छिन्नमित्यर्थः अथवाकबंधाअसुर

केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे शिरांसिपेतुरन्येषामन्येमध्येविदारिताः ६० विच्छिन्नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः

एकबाह्वक्षिचरणाःकेचिद्देव्याद्विधाकृताः ६१ छिन्नेपिचान्येशिरसिपतिताःपुनरुत्थिताः कबंधायुयुधुर्देव्यागृहीतपरमायु

धाः ६२ ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः कबंधाश्छिन्नशिरसःखड्गशक्त्यृष्टिपाणयः ६३ तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहासुराः रामु

जातिविशेषास्तद्विशेषणंछिन्नशिरसइति अथवाकबंधजात्यपरव्यवच्छेदकेछिन्नशिरसइति एतिष्ठतिष्ठेतिचेवोक्तादेव्यायुयुधिरेरुषे ६४

विशेषणं ऋष्टयःएकधाराःखड्गाःकृन्यायुधविशेषाः ६३ देवीमितितिष्ठतिष्ठेतिभाषंतोहस्ताक्षेपादवभाषमाणाइव एवइवार्थोज्ञेयःअन्यथा राम

छिन्नशिरस्त्वात्कथंतिष्ठतिष्ठेतिवदिष्यंतिभाषतइतिआत्मनेपदिनोपिधातोश्छांदसःशतृप्रत्ययइतिज्ञेयंअथवाभाषतइतिभाषःपच १७

भाषतीत्याचारार्थःक्विप ततःशतृप्रत्ययइतिज्ञेयंअन्योकबंधेभ्यइतरेयुयुधुरेवेत्यनुषज्यते ६४ ॥

पातितैरथनागाश्वैः असुरैः सा वसुंधरा तत्र दुष्प्रवेशाभवत् यत्र स महारणोऽभूत् ६५ वारणासुरवाजिनां शोणितमेव.
सु ६६ वारणा हस्तिनो महासैन्यसैन्यसमुदायं निन्ये नीतवती ६७ स च सिंहो मरारीणां शरीरेभ्योऽसूनिव विचिन्वति आदाय सनुप्रवृनो
ति इवेत्युत्प्रेक्षायां विचिनोति वक्तव्ये छंदोनुरोधेन छादसो कारागमः । यद्वा अतिशयेन विचिन्वति विनोदित्यर्थः क्रियासमभिहा
रे लोट् लोटो हि हि रिति लोटं सर्वलकारार्थविहितमानीय साधनीयं तदा छांदसः परनिपातो नि शब्दस्य यद्वा विचिन्वतीति शतृप्रत्ययांतस्य सप्त

पातितै रथनागाश्वैरसुरैश्च वसुंधरा अगम्या साभवत्तत्र यत्राभूत्स महारणः ६५ शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः मध्ये
चासुरसैन्यस्य वारणासुरवाजिनां ६६ क्षणेन तन्महासैन्यमसुराणां तथांबिका निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं ६७ स च सिं
हो महानादमुत्सृजन्धुतकेसरः शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ६८ देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः यथैषां तुतुषु
र्देवाः पुष्पवृष्टिमुचो दिवि ६९ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥ ॥

म्येकवचने रूपं तदा स च सिंहोऽसुराणां महासैन्यं क्षयं निन्ये इति पूर्वेण संबंधः तस्मिन्सिंहे मरारीणां शरीरेभ्योऽसून्प्राणान्विचिन्वति राशीभवत्कु
र्वति सति ६८ देव्या गणैश्च तथा युद्धं कृतं यथा दिवि देवा एषां तुतुषुः परितुष्टा बभूवुः अथ वा एषां युद्धं दृष्ट्वा तुतुषुः कर्मणि वा षष्ठी इति ६९ इति
श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रामाश्रमटीकायां महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः २ ॥ ॥ ॥

देवी० अथावलोकनानंतरं १ यथा मेरुगिरेः शृंगमित्यद्भुतोपमा मेरुशृंगादधस्तादेव मेघमंडलस्य विद्यमानत्वात् २ शरोत्करान् बाणसमूहान् यंतारं सा
१८ रथिं वाजिनं रथकुंजरतुरग — — — मारोहणार्थमेव केरुपस्थापितं ३ छिन्नधनुः यस्यासौ छिन्नधन्वा तं आशुगैर्बाणैः ४ स छिन्नचापोऽसुरः निकृत्तचापो
रथरहितो हताश्वा यस्य सः खड्गं खेटकं चादाय धावति स्म ५ आजघानेत्यत्रालंगाकर्मत्वाभावात् आङ्पूर्वो यम हन इति नात्मनेपदं सव्ये वामे भुजे देवीम् आ
जघानेत्यन्वयः ६ तस्या भुजमित्यन्वयः पफाल व्यशीर्यत त्रिफला विशरणे इत्यस्य रूपं हे नृपनंदन अथवा नृपं नंदयतीति नृपनंदः तस्य संबोधनं हे

ततो निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां १ स देवीं शरवर्षेण ववर्ष समरेऽसुरः यथा मेरुगि
रेः शृंगं तोयवर्षेण तोयदः २ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् जघान तुरगान्बाणैर्यंतारं चैव वाजिनं ३ चिच्छेद च धनुः सद्यो ध्वजं
चातिसमुच्छ्रितं विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ४ स छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधावत तां देवीं खड्गचर्मधरो
ऽसुरः ५ सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि आजघान भुजे सव्ये देवीमप्यतिवेगवान् ६ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ततो
जग्राह शूलं स कोपादरुणलोचनः ७ चिक्षेप च ततः शूलं भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ८

नृपनंदन पफाल स्वीयं फलनिष्पत्तिं न चकारेत्यर्थः ७ ततः शूलं तमिति पाठेऽपि शूलमेव तच्छब्देन ग्राह्यं शूलशब्दस्य पुंल्लिंगेऽपि विद्यमानत्वात् अस्त्री शूलमि
ति द्विलिंगत्वेनाभिधाने संगृहीतत्वात् भद्रकालीविषये तेजोभिः रश्मिभिर्जाज्वल्यमानमत्यर्थं ज्वलत् अंबरात् आकाशे सप्तम्यर्थे पंचमी छांदसी यद्वा अंब
रे समवस्थाय रविबिंबमिवेति ल्यब्लोपे पंचमी केचित्तु अंबरं अनंतनीलं बरात् अनंतात् आगमनेन तस्मात् ल्यबंतान्निष्पाद्य रविबिंबस्य विशेषण ... योज राम
यंति तेजोभी रविबिंबमिवेति रकारलोपे सति दीर्घत्वं रलोपे पूर्वस्य दीर्घोऽण इत्यनेन स्वरपवित्र अवि — — — — एवरविवचन — — ... नार ८ १८

तद्दैत्यप्रयुक्तं शूलं तेन देवीशूलेन शतधा नीतं चूर्णीकृतं सच महासुरः चिक्षुरः शतधा नीत इत्यनुषज्यते ९ तस्मिन्महिषस्य सेना-
पतौ राति दित्सति आमरं नाम गजारूढः समरायायासीत् १० देव्या वधाय शक्तिं मुमोचेति षष्ठ्यां योजनीया तां शक्तिं ११ तच्छूलं सांबिका
नागजस्य कुंभांतरे कुंभस्थलमध्ये स्थितः १३ नागाद्गजात् महीं पृथिवीं युयुधाते अतिसंरब्धावित्यत्र प्रश्लेषसंज्ञायां सत्यामपि छंदोभंगन्यायेन नो

दृष्ट्वा तदापतच्छूलं देवी शूलममुंचत तेन तच्छतधा नीतं शूलं स च महासुरः ९ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ आजगाम गजारू-
ढश्चामरस्त्रिदशार्दनः १० सोपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतं हुंकाराभिहतां भूमौ पातयामास निष्प्रभां ११ भग्नां शक्तिं निपति-
तां दृष्ट्वा क्रोधसमन्वितः चिक्षेप चामरः शूलं बाणैस्तदपि साछिनत् १२ ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः बाहुयुद्धेन युयुधे तेनो-
च्चैस्त्रिदशारिणा १३ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः १४ ततो वेगात्खमुत्पत्य निपत्य
च मृगारिणा करप्रहारेण शिरश्चामरस्य पृथक्कृतं १५ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैव करालश्च निपाति-
तः १६ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं बाष्कलं भिंडिपालेन बाणैस्ताम्रं तथांधकं १७

कारस्य पृथक्करणं मणीवादित्वात्प्रश्लेषसंज्ञाभावाद्यातिसंरब्धौ क्रोधातिशययुक्तौ १४ वेगात् खमाकाशमुत्पत्य दैत्योपरि निपत्य च सिंहेन चाम-
रस्य शिरश्छिन्नं १५ उदग्र उदग्रसंज्ञः वृक्षे दंते मुष्टिभिस्तलैः पीटैश्च प्रहारं प्राप्य गत्वेषीतरेतरयोगश्चांद्रसः १६ उद्धतं उद्धतनामानं एतान्यग्रिमाण्यपि दैत्य-
नामानि ज्ञेयानि १७

देवी टी. त्रीणिनेत्राणियस्याःसात्रिनेत्रापरमामायाशक्तिर्येषांतेपरमादयस्तेषामपीश्वरीनियंत्री १८ विडालस्यबिडालाख्यस्यसंज्ञैकदेशेनापि
१९ संज्ञिप्रतीतिरितिन्यायात् उभौयमस्पष्टार्थंग्रहंनिन्येकालभावित्याकांक्षायामाह दुर्द्धरंदुर्मुखंचेतिद्वितिपदाधिकरणान्यायेनोभशब्दोयो
19 जनीयोन्यथाव्यर्थःस्यात् १९ माहिषेणमहिषाकारेणतानिःश्वासप्रभवान् २० तुंडम्मुखंतत्करणकप्रहारेणकांश्चित्क्षितलेपातयामासेत्यपि

उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं त्रिनेत्राचत्रिशूलेनजघानपरमेश्वरी १८ बिडालस्यासिनाकायात्पातयामासवैशिरः दुर्द्धरंदुर्मु
खंचोभौशरैर्निन्येयमक्षयं १९ एवंसंक्षीयमाणेतुस्वसैन्येमहिषासुरः माहिषेणस्वरूपेणत्रासयामासतान्गणान् २० कांश्चित्तुंड
प्रहारेणखुरक्षेपैस्तथापरान् लांगूलताडितांश्चान्याञ्छृंगाभ्यांचविदारितान् २१ वेगेनकांश्चिदपरान्नादेनभ्रमणेनच निःश्वासपव
नेनान्यान्पातयामासभूतले २२ निपात्यप्रमथानीकमभ्यधावतसोसुरः सिंहंहंतुंमहादेव्याःकोपंचक्रेततोम्बिका २३ सोपिको
पान्महावीर्यःखुरक्षुण्णमहीतलः शृंगाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच २४ वेगभ्रमणविक्षुण्णामहीतस्यव्यशीर्यत लांगू राम
लेनाहतश्चाब्धिःप्लावयामाससर्वतः २५

मेणासंबंधः भ्रमं २२ सोसुरःप्रमथसैन्यंनिपात्यमहादेव्याःसिंहंहंतुमभ्यधावत ततोनंतरंअंबिकाकोपंचक्रे २३ खुरैःक्षुण्णंसंमर्दितं राम
महीतलंक्षुण्णंयेनसः २४ तस्यवेगभ्रमणाभ्यांविक्षुण्णामहीस्वयमेवव्यशीर्यताविशीर्णा कर्मकर्तृत्वेआत्मनेपदं २५ ॥ ॥ १९

खंडंखंडंभिन्नाक्रियाविशेषणं ययुरुपगताघनामेघाः श्वासानिलेनश्वासवायुनाविक्षिप्ताःनभसआकाशात्अचलाः २६ क्रोध
समाध्मातंकोपानलेनोद्दीपितं २७ तस्येतिसंबंधलक्षणेषष्ठीतस्यबंधनायेत्यर्थः माहिषंमाहिषमहिषसंबंधिमहामृधेमहासंग्रामे २८

धुतशृंगविभिन्नाश्चखंडंखंडंययुर्घनाः श्वासानिलाहताःशीर्णानिपेतुर्नभसोचलाः २६ इतिक्रोधसमाध्मातमापतंतंमहासुरं दृ
ष्ट्वासाचंडिकाकोपंतद्वधायतदाकरोत् २७ साक्षिप्त्वातस्यवैपाशंतंबबंधमहासुरं तत्याजमाहिषंरूपंसोपिबद्धोमहामृधे २८ ततः
सिंहोभवत्सद्योयावत्तस्यांबिकाशिरः छिनत्तितावत्पुरुषःखड्गपाणिरदृश्यत २९ ततएवाशुपुरुषंदेवीचिच्छेदसायकैः तंखड्गचर्म
णासार्धंततःसोभून्महागजः ३० करेणचमहासिंहंतंचकर्षजगर्जच कर्षतस्तुकरंदेवीखड्गेननिरकृंतत ३१ ततोमहासु
रोभूयोमाहिषंवपुरास्थितः तथैवक्षोभयामासत्रैलोक्यंसचराचरं ३२ ततःक्रुद्धाजगन्मातांचंडिकापानमुत्तमंपपौपु
नःपुनश्चैवजहासारुणलोचना ३३

सद्यस्तत्क्षणमेव २९ आशुवशीघ्रमेवतत्पुरुषंबाणैश्चिच्छेदेत्यन्वयः खड्गचर्मणासार्धंसहितंपुरुषंखड्गंचर्मचचिच्छेदेत्यर्थः ३० कोणागुडादं
डेनतंदेवीवाहनत्वेनप्रसिद्धंकरेणसिंहंकर्षतोगजस्यकरंनिरकृंततविच्छेदकर्मव्यतिहारेआत्मनेपदं ३१ वपुःशरीरंआस्थितोगृहीतवान्तथा
पूर्ववत् ३२ पीयतेइतिपानंमधु ३३

ई॰टी॰ बलंसामर्थ्यंवीर्यमुत्साहः ताभ्यांमदोगर्वः तेनोद्धतः असंकुचितवृत्तिः ३४ सादेवीतान्सम्भ्रुषरान्मदेनोद्धतोद्धुरखरागोयस्मात्साद्भ्राकुलान्य
२० व्यक्तान्यक्षराणियस्मिन्वचनेतद्यथाभवति तथोवाच समस्तवाक्यिपादिविशेषणंमुखरागाभावाकुलितात्क्षरमित्यर्थः ३५ गर्जगर्जेतिसंभ्र
मेपुनरुक्तिः ३६ आक्रम्यपृष्ठइतिशेषः ३७ ततःशूलेनताडनानंतरंपदाक्रांतोयोतिनिजमुखवादात्मुखनात् ततःशूलताडवाद्धेतोरर्धनिष्क्रां
तोनिःसृतार्धकायआसीत् तयादेव्याअर्धनिष्क्रांतएववीर्येणसामर्थ्येनअतिअतिशयेनसंहृतःप्रतिबद्धः अर्धनिष्क्रांतएवासौदेव्यावीर्येण

ततर्ईवासुरःसोपिबलवीर्यमदोद्धतः विषाणाभ्यांविचिक्षेपचंडिकांप्रतिभूधरान् ३४ साचतान्प्रहितांस्तेनचूर्णयंतीशरोत्करैः उवाचे
नमदोद्धतमुखरागाकुलाक्षरं ३५ श्रीदेव्युवाच गर्जगर्जक्षणंमूढमधुयावत्पिबाम्यहं मयात्वयिहतेत्रैवगर्जिष्यंत्याशुदेवताः
३६ ऋषिरुवाच एवमुक्त्वासमुत्पत्यसारूढातंमहासुरं पादेनाक्रम्यकंठेचशूलेनैनमताडयत् ३७ ततःसोपिपदाक्रांतस्तयानि
जमुखात्ततः अर्धनिष्क्रांतएवासोदेव्यावीर्येणसंवृतः ३८ अर्धनिष्क्रांतएवासौयुध्यमानोमहासुरः तयामहासिनादेव्याशिर
श्छित्त्वानिपातितः ३९ ततोहाहाकृतंसर्वंदैत्यसैन्यंननाशतत् प्रहर्षंचपरंजग्मुःसकलादेवतागणाः ४० राम

संवृतइतिपाठःक्वचित् ३८ महासिनामहताखड्गेनएवंचशिरश्छेदोद्भवेनहृदानवंवज्रधारिणामित्यादिविशेषोमहिषासुरविषयःकतिपयःकाचि २०
यमाणाःकल्पांतरेणइतिप्रतीयते ३९ तत्सर्वंइसिद्धदैत्यसैन्यंहाहाकृतेक्कनहाहाशब्दसहनंनाशअदर्शनंप्रापपलायितमित्यर्थः।त[illegible]निष्क्रा
ंतिस्पष्टः।तदायद्वाशिछित्तन्ननाशेतियोजनीयंसर्वहतनानाविशिष्टं।सर्वजोदनोभुक्तइतिवत्सर्वशब्दःप्रकृत्याभिप्रायःप्रहर्षंहर्षादिकपं[illegible]मुः

दिविभवैर्दिव्यैः महर्षिभिः नारदादिभिः ४१ महिषासुरे हते पवित्रा मधुरा वा वायवो वांतिस्म दिवाकरः सुप्रजातो बभूव तथाग्नयो न ... शरवाः
प्रदक्षिणावर्त्तिनो ज्वलंतिस्म दिक्षूत्पन्ना उत्पातशब्दाः शांताः शमं जग्मुः महारौद्रे महिषासुरे व्यापादिते सकलेपि लोके एवं महोत्सवभरः प्रसरीसर्त्तिस्म
४१ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रामाश्रमविरचितायां टीकायां तृतीयोध्यायः ३ देव्याः स्तुतिं कर्तुमारेभिरे इति संबं
धः १ अयं श्लोकः क्वाचित्कः तस्मिन् महिषासुरबले देव्यसैन्ये च देव्या निहते शक्रादयः सुरगणास्तां देवीं वाग्भिस्तुष्टुवुरित्यन्वयः देवा इति पाठे कथं
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ४१ ववुः पुण्यास्तथा वाताः सुप्रभोभूद्दिवाकरः। ज
ज्वलुश्चाग्नयः शांताः शांताः शांता दिग्जनितस्वनाः ४१ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरव
धो नाम तृतीयोध्यायः ३ ततः सुरगणाः सर्वे देव्या इंद्रपुरोगमाः स्तुतिमारेभिरे कर्त्तुं निहते महिषासुरे १ शक्रादयः सुरग
णा निहतेतिवीर्ये तस्मिन् दुरात्मनि सुरारिबले च देव्या तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः २

भूताः सुरगणाः देवाः कीदृशाः शक्रा इति योज्यं शिरोधराग्रीवा अंसाः वाग्मूर्द्धानः तेषां समाहारः शिरोधरांसं अत्र अंशशब्दह्रस्वपरनिपातश्छांदसः शिरोधरांसा इ
ति दंत्यः सकारः क्वचित् नदांत्ये सपाठः स्कंधवाचकः समासपरनिपातादि पूर्ववदेव प्रणत्या नम्रे शिरोधरांसे शिरोधरांसं वा येषां ते केचित्त्वंस
शब्दं ग्रीवावाचकतया व्याकुर्वंति तन्मते। शिरोधरे ति ग्रीवा विशेषणं। पुनः कथंभूताः सुरगणाः हर्षजनितरोमोत्थानेन चारवो देहा येषां ते प्रहर्षपुल
कोद्गमचारुदेहाः २

देवीटी॰ प्रकृष्टस्य भावं अनन्यसाधारणं सामर्थ्यं बलं क्रमेण पर्याया इत्यन्वयः अशुभभयकल्याणां क्षयं मालिदुः स्वप्रतिसंधानजमसुखं तयोः समाहारो
२१ अशुभभयं तस्य नाशायेत्यन्वयः वैशेषिकएकवद्भावः अशुभमेभ्यो भयं अशुभभयं पंचामयं ३ सुकृतवतां गृहेषु या स्वयमात्मा या पूर्वरूपपरि
हारेण संपदित्यन्वयः तथा पापकृतानां तःकरणानां भवनेष्वविपत् सत्यज्ञानानंदादिरूपाया भगवत्याः समीचीना सत्यरूपा तोऽसमीचीनो
21 विपरीतस्वरूपो हेषो या नास्तिव भक्तेः कल्पिततत्त्वाविशेषणात् तेनालक्ष्मीरूपेण भगवत्या विवर्तोक्तिर्न विरुद्धेति मंतव्यं तथा कृतधियां वेदा
र्थानुष्ठानरूपं श्रद्धा वेदोक्तेविचाराभ्याससंस्कृतांतःकरणानां हृदयेष्वंतःकरणेषु याबुद्धिः स्वर्गापवर्गसाधने ज्ञानं तथा सतां वेदार्थानुष्ठा
नरूपं श्रद्धा वेदोक्तगुरूक्तेऽर्थे विश्वासः कुलमस्यास्तीति कुलः अशीयादिभ्यो इतस्माज्जनानां प्रभवत्यानिर्यस्य तस्यपालज्जाकरणीयाप्र

यस्याः प्रभावमतुलं भगवाननंतो ब्रह्मा हरश्च नहि वक्तुमलं बलं च सा चंडिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य
मतिं करोतु ३ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां तां
त्वां नताः स्म परिपालय देवि विश्वं ४ किं वर्णयाम तव रूपमचिंत्यमेतत्किं चातिवीर्यमसुरक्षयकारि भूरि किं चाहवेषु चरितानि तवाद्भु रिकेष्वचिन्त्यानियतः ५

वृत्तिलक्षणांतःकरणधर्मः तां उक्तरूपां त्वां नताः स्म हे देवि जगत्परिपालय ४ तानि यस्तुतिर्वस्तु \\ तानि सर्वेषु देव्यसुरदेवगणादिकेषु ५
तावस्वरूपं वर्णयितुमशक्यमित्याह किमिति वर्णयाम इति समर्थ वाक्यालोर तेनोक्तं वर्णनसामर्थ्यं संदेहे पार्थनकिं शब्देनाक्षिप्यते तवस्वरूपं वर्ण राम
यितुं न शक्तं न शक्नुमः इत्यर्थः असामर्थ्ये हेतुमाह अचिंत्यमिति सर्वेषु सुरदेवगणादिकेषु अनिरूपणीयं सर्वोत्कृष्टतानां एतत्प्रसिद्धमतिवीर्यमनन्यसाधा २१
रणं सामर्थ्यं च किं वर्णयाम यतोऽचिंत्यं सर्वेषु असुरक्षयकारणशीलं प्रभूतं हे देवि संग्रामेषु यानि चरितानि तानि किं वर्णयाम [illegible] देवगणा

देवियस्याःस्वाहात्मकशब्दरूपायाउच्चारणेनसमस्तसुरतानिःशेषदेवगणःतृप्तिंप्रयातिसास्वाहात्वंमवासियज्ञदोःसाहचर्यनियमात्
।।पितृगणस्यचतृप्तिहेतुःस्वधाचत्वमेवासीत्यन्वयः अतोहेतोःत्वंजनैरुच्चार्यसेपितृकर्मस्वितिशेषः ननु हेतोःसमस्तजगतामितिशे
के सर्वजगत्कारणत्वात्तयासर्वात्मकत्वेनस्तुतिःकृतातदनंतरंस्वाहाद्यात्मकतयास्तुतिर्निंदापर्यवसानीस्यात् पृथिवीश्वरत्वोक्तिव
त्।एवमुत्तरत्रश्लोकेब्रह्माणमिहेतुविद्यारूपस्तुतिविरुद्धाब्रह्मत्वब्रह्मरूपत्वस्यपूर्वमुक्तत्वात्इतिचेन्न अत्रोच्यते।स्वाहाद्यात्मकत्वोक्त्या

यस्याःसमस्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि स्वा
हासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच ६

एवोक्तिःसर्वात्मकत्वंदृढीक्रियतेनोनहिपृथिवीश्वरस्यापिग्रामीणैरुच्यमानोग्रामेशत्वमेवेत्याद्युक्त्याग्रामेशत्वंनिंदापर्यवसायिदृष्टंस्तुतेः
क्रमनियमाभावाच्चक्रमनियमाभावश्चप्रसिद्धःत्वमेवसा — — — सीत्यादिस्तुतौ अथार्थक्रमेणपाठक्रमोबाध्यतेअग्निहोत्रंजुहोतियवा
गूंपचतीत्यादौविवृतेनतत्तेयास्तुतिः सर्वात्मज्ञेयासर्वोत्कृष्टत्वप्रतिपादनमेवचात्रार्थप्रयोजनं ६

देवीटी· हेदेविसाप्रसिद्धातत्त्वमस्यादिवाक्याजन्मब्रह्माकारांतःकरणवृत्तौस्फुरंतीविद्यात्वमसितत्त्वमस्यादिवाक्यजन्यायमानांतःकरणप्रवृत्तिर्ब्र
२३ ह्मस्वरूपावारकमज्ञानंनाशयतिब्रह्मस्वरूपंतुस्वतएवस्फुरतीतिविद्याब्रह्मस्वरूपैवोच्यतेस्माभिः श्रवणादीनामविद्यानिवृत्तावेवो
23 पयोगात्स्वरूपात्मिकाविद्यायाजन्यत्वमपिनशंकनीयं केचित्तुब्रह्मविषयाविद्येतिवदंति तन्मतेवृत्यात्मकैवविद्यायानां।विद्यात्मक
त्वाब्रह्मणःफलविषयत्वयोगात् भगवती भगशब्दवाच्यैश्वर्यादिषड्गुणसंपन्नाब्रह्मविषयेतिकेचित् परमाप्रकृष्टतमाप्रकृष्टतमत्वप्रतिपा

यामुक्तिहेतुरविचिंत्यमहाव्रतात्वमभ्यस्यसेसुनियतेंद्रियतत्त्वसारैः मोक्षार्थि
भिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमासिदेवी ७

दनायाह यामुक्तिहेतुरिति साविद्यायामुक्तयेइतिवचनात् अचिंत्यमननुष्ठेयंमहाव्रतंसाधनंयस्याःसातथा भगवान्पातंजलिः अहिंसासत्य
मस्तेयब्रह्मचर्यापरिग्रहाइतिहिशब्दोहेतौ यस्माद्विद्यासि अतस्त्वंमुनिभिर्मननशीलैरभ्यस्यसे सुष्ठुनियतानिवशीकृतानीइंद्रियाणियैःतेनियतें राम
द्रियाःतत्त्वंब्रह्मैवसारोयेषांतेतत्त्वसाराःसुनियतेंद्रियाश्चतेतत्त्वसाराश्चेतिविग्रहःअस्ताःध्वस्ताःसमस्ताःदोषारागादयोयेषांतैः ७ ॥ ॥ २३

शब्दात्मिका शब्दब्रह्मस्वरूपा ऋक्‌ऋग्वेदाः यजूंषि यजुर्वेदाः शाखाभिप्रायं बहुवचनं यजुर्वेदस्य षडशीतिशाखात्मकत्वात् सुविमलानि नि-
र्दोषाणि च तानि ऋग्यजूंषि चेति विग्रहः तेषां साम्नां च निधानमाश्रय इत्यर्थः साम्नामित्यपि बहुवचनं शाखाभिप्रायं सहस्रशाखात्मकत्वा-
त्सामवेदस्य निधानशब्दो अजहल्लिंगः। तेन न स्त्रीलिंगता उद्गीतिश्च वैगानं। तेन रम्यः पदानां पाठो विद्यते येषु सामसु तानि रम्यपदपाठवंति।
तेषां उद्गीथेति पाठे उद्गीथः प्रणवो मंत्रः सर्वव्यापी निरंजन इति नैगमाभिधानात् तेन रम्यपदपाठवतामिति सर्वेषामेव विशेषणं ब्रह्मणः प्रण-
वं कुर्यादादावंते च सर्वदा स्रवत्यनोंकृतं पूर्वं पुरस्ताच्च विशीर्यतीति मनुः इत्थं त्रयीवेदत्रयीस्वरूपा त्वं। अथर्वणस्तु शांतिकपौष्टिकतयैतेष्वेवांत-

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां देवी त्रयी भगवती भवभावनाय वार्त्ता सि सर्वजगतां परमार्त्तिहंत्री ८

र्भावात् पृथङ्न निधानं। देवयति सर्वान्। प्रवृत्तिनिवृत्त्युपदेशेन व्यवहारयतीति देवी भगवती वीर्यातिशयशालिनी सर्वप्राणिभ्यो बलीयस्त्वात्।
भवः संसारस्तस्य भावनायोद्भवनाय वार्त्ता कृष्यादिलक्षणा कृषिवाणिज्या तृतीयं पशुपालनं विद्याद्येतां महाभागवते हन्निव्व-
प्याश्रयेति। विष्णुपुराणे वार्त्तायाः कृष्यादिरूपत्वमुक्तं परमार्त्तिहंत्री। पीडातिशयनाशिनी भवभावनाय संसारज्ञानार्थं त्रयीवेदस्त्वमित्यन्वयः
अन्य आह। भवभावनाय संसारस्थितये त्रयी त्वं यज्ञोपदेशात्। तथा चाहुः। अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं
ततः प्रजा इति ८

देवीटी.
२४
२५

मेधासरस्वतीरूपात्वमेवासि अथवा मेधाबधारणाशक्तिः ययावेदादिरूपःशब्दराशिःस्थिरीक्रियते विदितोखिलशास्त्राणांसारःतत्त्वंरहस्यंवायया
दुर्गादुर्ज्ञेयादुर्गोदुरवच्छेदोयोभवःसंसारस्तद्रूपःसमुद्रःतत्रनौरिवनौःपारगतिसाधनं असंगाआसक्तिरहितप्रसंगाअद्वितीयावानौरसुकर्णवाहकमुक्ता
त्वंनुतइहितापितारयसिश्रीःलक्ष्मीर्हरेर्हृदयेएकस्याःहितोयाकृतोधिवासःस्थितिर्यया अथवाकैटभारेर्हृदयेएकस्मिन्कृतोधिवासोययासाश्रीस्त्वं
गौरीत्वंशशिमौलेर्हरेणकृताप्रतिष्ठाआस्पदंयया।शशिमौलेर्हरस्यकृताप्रतिष्ठा।उत्कर्षोययेतिवासागौरीत्वमेव ९ ईषद्धासेनसहवर्त्ततेतदीषद्धासंत
दुक्तौवर्णविपर्ययः ईषन्मात्रंयथाभवतितथाविलोक्येतिक्रिया।विशेषणंवाहासेनसहितंसहासं परिपूर्णचंद्रबिंबमनुकरोतितत्छीलंपरिपूर्णचंद्र
बिंबानुकारिआह्लादकारित्वात् कनकोत्तमंअत्युत्कृष्टकांचनंतस्यकांतिर्यस्य कनकादप्युत्तमाकांतिर्यस्येतिवा।अतएवकांतंमनोहरं कनको

मेधासिदेविविदिताखिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा श्रीःकैटभारिहृदयैककृताधिवासागौरीत्वमेवशशिमौलिकृतप्रतिष्ठा ९
ईषत्सहासममलंपरिपूर्णचंद्रबिंबानुकारिकनकोत्तमकांतिकांतं अत्यद्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलोक्यसहसामहिषासुरेण १०

त्तमकांतिवत्कांतमित्येकंवापदं एतेनदेव्याःस्निग्धगौरांगत्वंसूचितंतथाताहृशमपितेवक्त्रंविलोक्यमहिषासुरेणयत्प्रहृतंतदत्यद्भुतमत्याश्चर्यमित्यर्थः
प्रहृतमितिनपुंसकेभावेक्तः प्रहारःकृतइत्यर्थः अपवादातिशयमनर्हत्वात्।अत्यद्भुतमाश्चर्यजनकंतेमुखंविलोक्य तथापितामसस्वभावादविचारेण राम
प्रहृतमितिपोजना।अविचारेणप्रहारकारणेहेतुगर्भविशेषणंआत्तरुषेतिप्राप्तक्रोधेनेत्यर्थः।आत्तरुषेतिबहुषुपुस्तकेषुपाठः।तथापिसएवार्थःक्रोधा २४
—द्धिप्रहारयोग्यवैतिकिमपिनविचारयतिअतःप्राप्तरुषामहिषासुरेणात्यद्भुतंमुखंविलोक्यापितथापिपूर्वोक्तरूपाणप्रहृतमितिवातथाशब्दोयोजनीयःसह
सावलेन १०

रामु

हेदेविकुपितंतेमुखंदृष्ट्वातत्क्षणान्महिषःप्राणान्यन्नमुमोचतदेवाश्चर्यंभ्रुकुट्याभालकौटिल्येनकरालंभीषणंउद्यच्छशांकसदृशछवि रोषारुणं हि यस्मा
त् कुपितस्यांतकस्ययमस्यदर्शनेनकैर्जीव्यतेजीवितुंशक्यतेअपितुनकैरित्यर्थः ॥ प्रसीदप्रसादंकुरुपरमाप्रकृष्टासात्वंयदासतीभवतीभवायउद्भव
संपदेइत्यर्थः।यद्वाभवायभावनायसंसारविभूतिजननायभवसीपरमोत्कृष्टा॥प्रसादरमेतिपाठेप्रसादेनपरमाभवतीभवायस्थितिंप्रकाल्पतेकोप
वतीकुलानिगणान्नाशयसि।एतदधुनैवज्ञातं।यदेतन्महिषासुरस्यसुविपुलंसैन्यअस्तंनीतंनाशंप्रापितं।त्वत्कोना — — स्यदैत्यबलस्य

दृष्ट्वापिदेविकुपितंभ्रुकुटीकरालमुद्यच्छशांकसदृशछवियन्नसद्यः प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यतेहिकुपितांतकदर्शने
न ॥ देविप्रसीदपरमाभवतीभवायसद्योविनाशयसिकोपवतीकुलानि विज्ञातमेतदधुनैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषा
सुरस्य १२ तेसम्मताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिधर्मवर्गः धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवती
प्रसन्ना १३

नष्टत्वादिदानींकोपावस्थानेत्युरान्नाशयतीत्यतःकोपंपरित्यज्यप्रसन्नाभवेत्यभिप्रायः १२ सदाभ्युदयदाभवतीयेषांप्रसन्नातेपुरुषाःजनपदेषुसम्मा
नभाजःस्युःयामादौसम्मताऽइतिकिमाश्चर्यमित्यर्थःअपरंतेषांधर्मवर्गेन — — दीतिअवसादंनलभतेधर्मशास्त्रोक्तधर्मोऽर्थकाममोक्षरूपपुरुषार्थश्च
तुष्टयस्योपलक्षणंधन्याःश्लाघ्याःनिभृताःविनीताःआत्मजभृत्यदाराःपुत्रसेवकस्त्रियोयेषांतेसदाजनपदेषुसम्मताइत्यादिवासदाशब्दान्वयः

देवीटी· हेदेविसुकृतीअत्यादृतःअतिश्रद्धावान्पुमान्सदैवधर्म्माणिधर्मादनपेतानिसकलानिकर्माणिकरोतिभवत्याअनुग्रहात् ततःकर्मणोहेतोःस्वर्गं
२५ ब्रह्मलोकादिलक्षणंप्रयाति तत्कारणत्वोक्तंचलभतेनतुभोदेवितेनकारणेनलोकत्रयेऽपिइहस्वर्गमोक्षेऽपिफलदात्वमितियोजनाभवतीप्रसादादि
25 त्युक्तंदेवतारोधात्पुंवद्भावःभवतीतिभिन्नंवापदंप्रसादात्प्रसन्नतयाननुभोदेवितेनहेतुनाभवतीलोकत्रयेऽपिफलदेत्यन्वयःतत्रैहिकफलंफलस
त्कर्माचरणेऽपिस्वर्गीयसुखानुभवःमोक्षिकंनिर्वाणंदेहद्वयंलोकद्वयइतिपाठेइहालोकेचेत्यर्थः १४ दुर्गसंकटप्रदेशेस्मृतासतीअशेषजंतोर्भयंहर

धर्म्माणिदेविसकलानिसदैवकर्म्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोक
त्रयेऽपिफलदाननुतेनदेवि १४ दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैःस्मृतामतिमतीवशुभांददासिदारिद्र्यदुः रामु
खभयहारिणिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता १५ ॥ छ

सि दुर्गेइतिसंबोधनंवास्वस्थैःस्थिरांतःकरणैःपुरुषैःस्मृतासतीअतीवशुभांमतिंमोक्षादिसाधनभूतांबुद्धिंददासि दारिद्र्यंनिर्धनतादुःखंप्रतिकूलवेदनी
यंभयमनागतप्रतिकूलसंधानजं एतत्त्रितयंहरतितच्छीलादारिद्र्यभयहारिणीतस्याःसंबोधनंहेदारिद्र्यदुःखभयहारिणिसर्वेषामुपकारसंपादनायसर्वे राम
षुकालेषुआर्द्रचित्तास्निग्धचित्तात्वदन्याकानकापीत्यर्थः दैत्यानामपिहननेनोपकारएवसंपाद्यतेरणेहतामुक्तिंस्वर्गंवालभंतेयतः ननुदुष्टविना २५
शकशीलत्वात् दुष्टानांमोक्षादिप्रमाणाभावाच्च सर्वोपकारत्वंकथमित्याशंक्यसमाधत्तेएभिरिति १५

एभिरस्तैर्हृतैः साद्भिर्जगत्सुखमुपैति प्राप्नोति प्रकृत्यादिभ्यस्तृतीया। एतेषु तेष्वित्यर्थः। तथा एतेः सुराश्चिराय चिरकालं नरकार्थं पापं प्रतिकूलं कुर्वन्तु ना
मा। नाम शब्दोऽभ्युपगमे अथवा आमशब्दोऽभ्युपगमवाची नकारो निषेधार्थः। अथवा आमशब्दो नरकवाची आमसंज्ञकं नरकाय पापं न कुर्वन्तीत्यर्थः
।संग्राममस्तम्भमधिगम्य च दिवं प्रयान्तिति मत्वा अहिता अरिषु विनिहंसील्यत्वयः हन्त मिन्नुम्नोद्यायां १६ भवतीहहेवविलोक्यैवसर्वासुरारभस्मात्किंन
करोति अपितु करोत्येवहृष्यैवेति पाठे दर्शनेनैवेत्यर्थः। एवं सति अरिषु यद्धत्त्वं प्रहितोऽपि व्यापारयसि तद्धिपर्वोऽपि हितिस्मात्तशास्त्रप्रणाल्लोकान्रक्षइलो
कान्प्रयान्तु इत्यमेवं प्रकारा साध्वी परोपकारनिरता मतिः तेषु हितेषु पितवभवति पंचमहापातकिनोरणे हताः सद्गतिं लभंते भवति तेषु हितेतिसाध्वी

एभिर्हृतैः सुखमुपैति जगन्न थैते कुर्वन्तु नाम नरकाय चिराय पापं संग्राममस्तम्भमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देव १६
दृष्टेव किं न भवती प्रकरोतिभस्मसर्वासुरानरिषु यत्प्रहितोऽपि शास्त्र लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेषु हितेषु साध्वी
१७ खड्गप्रभानिकरविस्फुरणोत्थयोग्रैः श्लाघ्यकान्तिनिवहेन दृशो सुराणां यन्नागता विलयमप्युमदिद्गुरेवं प्रयोग्यानन्तववविलोकयतां तदेतत् १८

त्पादेऽपि शङ्काध्याहारं विनैव योजना तेष्वरिष्वपि तेन त्वाति साध्वी मतिर्भवतीत्यर्थः १७ अर्थान्नवयः खड्गस्तस्य प्रभानिकरो दीप्तिसमूहः तस्य विस्फुर
णोः सर्वतः प्रसरणेः तथा तेनैव प्रकारेणोग्रैर्भयानकैः श्लाघ्यस्य श्लक्ष्णस्य कान्तिनिवहेन दीप्तिसमुदायेन चासुराणां दृशश्चक्षूंषि विलयं विनाशं यन्नागताः
तदेतदाश्चर्यमितिशेषः अथवा दृशो विलयं नागताः तन्नेत्रविनाशप्राप्तो। एतत्तवाननविलोकने कारणमिति योज्यं कथं भूतमाननं अंशुमत दीप्तिमत्
दुरवद्योति अर्धचंद्राचितं तत्त्वहृक्रस्य चन्द्रीकरणासंपर्कवशात्दृशो न नष्टा इति फलितार्थः १८ ॥ ॥

हे देवि दुर्वृत्तवृत्तशमनं दुर्जनचेष्टाखंडनं तव शीलं चरित्रं तथा एतत्परिदृश्यमानं तव रूपं सौंदर्यं अविचिंत्यं वक्तुमशक्यं अन्यैः सदा अतुलं तव वीर्यं
च हंतृ तौ देवानां पराक्रमो यैः तेषामसुराणां हेतुनाशकं हृतदेवपराक्रमाणामिति षष्ठी कर्मणि अनेन पूर्वोक्तशस्त्रव्यापारेणास्वर्गनयनरूपेण प्र
कारेण वैरिष्वपि दया प्रकटिता अथवा इत्थमेवं सम्यपि दयाशस्त्रेण हननलक्षणेति व्याख्येयं शस्त्रेण हताः पापिनो यतः स्वर्यंते उक्तं च द्वावेव प्रथितौ
लोके सूर्यमंडलभेदिनौ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति १९ हे देवि तव अस्य पराक्रमस्य केनोपमा भवतु न केनापीत्यर्थः शत्रुभयहारि शत्रु

दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः वीर्यं च हंतृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं १९
केनोपमा भवतु तेस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपि २० त्रैलो
क्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेपि हत्वा नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते २१

णां ——— भयकारिणां ——— अतिहारि अतिमनो — नोरूपं कुत्र न कुत्रापि किंतु भुवनत्रयेपि त्वय्येवेत्यन्वयः हे वरदे देवि चित्ते कृपा संग्रामक्रूरता
च भुवनत्रयेपि त्वय्येव दृष्टा नान्यत्रेत्यर्थः २० हे एतदखिलं समग्रं त्रैलोक्यं रिपूणामसुराणां नाशनेन त्वया त्रातं पालितं ते अस्माकं रिपुगणा अपि रण
मूर्धनि संग्रामप्रधाने स्थाने हत्वा दिवं नीताः स्वर्गं प्रापिता इत्यन्वयः उन्मदानां अहंकारिणां सुरारीणां तेभ्यो भवं जातं भयमप्यस्माकमपास्त
मपनीतं ॥ अतस्ते तुभ्यं नमः नमस्कारातिरिक्तप्रत्युपकारकरणे न अस्माकं सामर्थ्यमिति भावः २१ श्रीराम ॥

चापज्यानिःस्वनेन धनुषि विध्यमानाया प्रत्यंचायास्तस्या रवेण पाहि २२ दक्षिणे दक्षिणभागे आमरणे नेत्यत्र संज्ञापूर्वविधेरनित्यत्वात् ह्रस्वत्वाभावः प्रथा
सते रक्षामयामास अस्मत्संक्रामिनैः प्रदेशैरिति ॥ हरेर्यदक्रामिप देककेनरवशिनिव च्छलस्य उत्तरस्यामित्यत्र च्छंदोनुगा — मेध्यता २३ सौम्यानि सृष्टि
स्थितिव्यापाराणि अत्यंतमतिशयेन घोराणि संहारकारणानि च अत्यर्थघोराणीति च क्वचित्पाठः तत्रार्थतः संहाररूपप्रयोजनवशात् घोराणि भया
नकानि तैः अस्मान् रक्ष भुवं पृथिवीं च रक्ष २४ आदिशब्देन धनुश्चक्रशरादीनां ग्रहणं करपल्लवैः संगः संसर्गो विद्यते येषां तानि तैः अस्मान् सर्वतः सर्व

शूलेनपाहिनोदेविपाहिखड्गेनचांबिके घंटास्वनेननःपाहिचापज्यानिःस्वनेनच २२ प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे भ्रामणेनात्म
शूलस्यउत्तरस्यांतथेश्वरि २३ सौम्यानियानिरूपाणित्रैलोक्येविचरंतिते यानिचात्यंतघोराणितैरक्षास्मांस्तथाभुवं २४ खड्गशूलगदा
दीनियानिचास्त्राणितेंबिके करपल्लवसंगीनितैरस्मान्रक्षसर्वतः २५ ऋ उ च एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः अर्चि
तांजगतांधात्रीतथागंधानुलेपनैः २६ भक्त्यासमस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तुधूपिता प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान् २७

प्रकारेणावारक्षेत्यर्थः २५ नंदनोद्भवैर्देवोद्यानजातैः गंधैः श्रीरागादिभिः अनुलेपनैः श्रीखंडादिभिः सा जगतां धात्री विश्वजननी २६ न केवलमर्चिता धूपिता
च दिव्यैर्मनोहरैर्धूपैः सर्वसुरप्रधानत्वात् स्तुतिः शक्रेणैव कृता अन्ये सुराः स्तुतावनुसर्तारः अतस्तेषामौपचारिकं स्तुतिकर्तृत्वमादाय सुरैरिति बहुवचने
अन्यथानेकसुरस्वरत्वात् । एककारणाशक्तिनिर्णयो न स्यात् प्रस्तुतकोलाहलवशादेकस्यापि शक्रस्यार्थप्रतीतिर्न स्यात् गुणकर्मानुरूपा वा प्रस्तुतिर्न सद्गुणा राम
यथार्थरूपा नेनादिकेषु सर्वकर्तृकं विरोधाभावात् सपदि च सर्वैरेव स्तुतिः कृता त्यक्त्वाग्रहः नीहीशाहेत्यादौ एकवचनप्रयोगोऽस्मत्कृतः सुरगणाः सेन्द्रह परो जयः २७

हेसर्वेत्रिदशाःअस्मत्तोस्मात्सकाशात्स्म वद्भिरभिवांछितंव्रियतां अतिप्रीत्याप्रीत्यतिशयेनअतिप्रीतेतिवापाठः २८ अपरमन्यत्कर्त्तव्यंदुष्क
रंयत्तन्निवेद्यतां॥ अयंश्लोकःक्वाचित्कः २९ यत्कर्त्तव्यंतत्त्वयासर्वंकृतंयद्यस्मादयंत्वयानिहतः एतावतैवत्वयासर्वंकृतं ३० अस्माकमिति
चतुर्थ्यर्थेषष्ठीनोस्मभ्यंयदिवरोदेयःतर्ह्यस्माकंपरमापदोहिंसेथाइत्यन्वयःहिंसेथाइतिहिंसिधातुर्लुदादिगणोपिपठ्यतेतेनआत्मनेपदमितिकेचित् रुदा
दिगणस्यस्यपरस्मैपदित्वात्हिंस्याइतिस्यात्कथंचित्---नेपदानयनेपिहिंसीथाइतिस्यात्केचित्तुअदादिगणस्यस्यहिंसेथाइतिवदंतितन्नुच्छंअदा

वियतांत्रिदशाःसर्वैयदस्मत्तोभिवांछितं ददाम्यहमतिप्रीतास्तवैरेभिःसुपूजिता २८ महिषोयंमहावीरोनिहतश्चरणोमया कर्त्तव्यमप
रंयच्चदुष्करंतन्निवेद्यतां २९ देवाऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्यते यदयंनिहतःशत्रुरस्माकंमहिषासुरः ३० यदिवापिव
रोदेयस्त्वयास्माकंमहेश्वरि संस्मृतासंस्मृतात्वंनोहिंसेथाःपरमापदः ३१ यश्चमर्त्यःस्तवैरेभिस्त्वांस्तोष्यत्यमलाननेशुचिरेकमनाःशा
न्तोभक्त्यात्रिभुवनेश्वरि ३२ तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदां वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्वदांबिके ३३ ॥

दिप्रभृतिभ्यःशपइतिशपोलुकिकृतेविधिलिङियात्मनेपदमध्यमपुरुषैकवचनेहिंसीथाःइत्येवस्यात्नहिंसेथाइतिहिंसीयाइत्यपिक्वचित्पाठःहिं
सेर्णिचवतआत्मनेपदंलिङियोलिङ्क्षोदसादित्वात्तिवोल्लोपःहिंसेथाइतिकेचित्।हिंसेइतिसंबोधनंथाइत्यर्थइतिवा ३१ तत्रपरेयोमर्त्यःमरणा
धर्मामनुष्यःएभिःपूर्वोक्तैःस्तवैःस्तोत्रैःत्वांस्तोष्यति तस्यवित्तंवेदनंज्ञानंऋद्धिःरूपवयोविभवःऐश्वर्यंतैःकृत्वाधनदारादिसंपदांवृद्धयेउपचययास्मा
कंप्रसन्नासतीत्वंसर्वदाभवथाइत्यन्वयः अथवावित्तंगजमंतर्धनंऋद्धिःसमृद्धिःविभवःभोगःतैःधनदारादिसंपदांवृद्धयेभवेथाः।वित्तादिभिर्धनादी
नांवृद्धिर्भवति।अर्थैर्यानिबध्यंतेगजैरिवमहागजानित्यायात् ३३

इत्युक्तप्रकारेण जगतः आत्मनश्चार्थे भद्रं कल्याणं कलयति परिच्छेदयतीति भद्रकाली अंतर्हिता अदृश्या बभूव ३४ हे पृथिवीपते संभूता आदि
भूतान — तान्यत्रैव प्रमितव्यं पूर्वे प्रतिपादितस्वात्मविरोधत्वात् इति हासांतरं सूचयति पुनरिति त्रैलोक्यस्य हितमिच्छतीति ३५ गौरीदेहे प्र
वेती शरीरे आसनमासो वस्थितिर्यस्याः सा गौरीदेहा सा गृहीतगौरीशरीरेत्यर्थः अथवा गौर्या देहः शरीरकोश एव देहो देहकारणं यस्याः सा गौरी
देहा शाकपार्थिवादित्वान्मध्यमपदलोपो समासः अथवा गौरीमहादेवात् समुद्भूता गौरी से च देहो यस्याः सा गदितमाहात्म्या देवी गृहीतदेहासती

ऋषिरुवाच इति प्रसादिता देवैर्जगतोर्थे तथात्मनः तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ३४ इत्येतत्कथितं भूप संभूता सा यथा पु
नः पुरा देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ३५ पुनश्च गौरीदेहात् सा समुद्भूता यथाभवत् वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः
३६ रक्षणाय च लोकानां देवानामुपकारिणी तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ३७ इति श्रीमार्कंडेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोध्यायः ४ ऋषिरुवाच पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः त्रैलोक्यं यज्ञभागाः
हृता मदबलाश्रयात् १

यथा समुद्भूता भवत् तच्छृणु त्रिषितयान्निमेणान्वयः देहस्य हेतुः सा हेतुर्यायेति ३६ तच्छृणुष्व मयाख्यातमित्येको वा काकार्थः तेनुभ्यं यथावत्कथयामीत्यप
रः ३७ इति श्रीरामाश्रमविरचितायां देवीमाहात्म्यटीकायां चतुर्थोध्याय ४ इदानीं देव्या माहात्म्यांतरमाचिख्यासुः अनंतराध्यायसूचितमितिहासम
वतारयति ऋषिरुवाच असुराभ्यां दनुजाभ्यां तथा च वामनपुराणे तस्याः पुत्रत्रयं जज्ञे महस्त्राह्याद्बलाधिकं ज्येष्ठः शुंभ इति ख्यातो निशुंभश्चापराम्
रः ततीयो नमुचिर्नाम महाबलपराक्रमः शचीपतेरिंद्रस्य मदो गर्वः बलं शक्तिः तयोराश्रयात् १ ॥

देवीटी० २८

२९

सूर्यस्यभावःसूर्यतातांविलक्षणामधिकारंऐंदवमिंदुसंबंधिनं कौवेरमधिकारमथयाम्यमधिकारंवरुणस्यचाधिकारंकृतवंतौतावेवसूर्य
निशुंभौसूर्यत्वंचक्रतुःसूर्यइवाचरतः इंद्रोकुवेरस्ययमस्यावरुणस्यचाधिकारंस्वयंचक्राते २ पवनर्द्धिंवायोरधिकारंततोनंतरंदेवीसंस्म
रंत्यपराजिता ३ निशृष्टाज्ञत्वायोवननाशलक्षणादशाअवस्थायेषांदेवानांतेत्रिदशाःसंस्मरंतिस्मृतवंतःचिरातीतार्थेपित्रिषुवर्तमानतयाज्ञा
प्यते ४ कथंसंस्मरंतीत्यपेक्षायामाह तयेतिवरस्यस्वरूपमाहयथेति आपत्सुस्मृताहेतात्क्षणाद्भवतामखिलाःपरमापदोनाशयिष्यामि

तावेवसूर्यतांतद्वदधिकारंतथैंदवं कौवेरमथयाम्यंचचक्रातेवरुणस्यच २ तथैवपवनर्द्धिंचचक्रतुर्वह्निकर्मच ततोदेवाविनिर्धूता
भ्रष्टराज्याःपराजिताः ३ हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः महासुराभ्यांतांदेवींसंस्मरंत्यपराजितां ४ तयास्माकंवरोदत्तो
यथापत्सुस्मृताखिलाः भवतांनाशयिष्यामितत्क्षणात्परमापदः ५ इतिकृत्वामतिंदेवाहिमवंतंनगेश्वरं जग्मुस्तत्रततोदेवींविष्णु
मायांप्रतुष्टुवुः ६ देवाऊचुः नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मतां ७

राम

त्वुवुः ५ तत्रहिमवतिविष्णुमायांत्रिविधपरिच्छेदरहितांमायामित्यर्थः भक्तिश्रद्धातिशयलक्षणःप्रशाह्वेनयोत्पनेस्तुतौ ६ देव्यैद्योतनशीलायैमहत्तोदेवा
दीनपिदेवयतिसर्गादिभिर्व्यवहारयतीतिमहादेवीशिवंकल्याणंतद्धेतुत्वात्शिवातस्यैप्रकृत्यैमूलप्रकृतिरूपायैसत्त्वरजस्तमसांसाम्यावस्थायैप्र
कृतिःसर्वशक्तिरूपातस्यैइत्यर्थःभद्रमखिलप्राणिगणरक्षणंकरोतीतिभद्रास्थितिशक्तिस्तस्यैअथवाभद्रंकल्याणंतद्योगात्हानाद्वाभद्रा नियताश्चित्ते
प्रणिधानभाजोनियमयुक्ताःसंतोवास्मोतेवास्मेतिपादपूरणेस्मइत्यर्थेवातांजगद्धेतुत्वेन
प्रसिद्धांप्रणताःस्मइत्यर्थः ७

राम
२८

रुद्रस्येयंरौद्रीइंद्राणांपरिणाममकर्कशंसंहृतिरूपंकर्मास्याअस्तीतिरौद्रीअर्शआदिभ्योऽच्मत्वर्थीयोरौद्रीतिस्मात् तस्यैसंहृतिशक्त्यैइत्यर्थः नित्यायैका
लानवच्छिन्नायैगौर्यैगौरवर्णायैधात्र्यैजगत्पोषकार्यै जगद्धारणशीलायैवानमोनमइतिभक्त्यतिशयेवीप्साज्योत्स्नायैपूर्णचंद्रमंडलमरीचिरूपा
यैइंदुरूपिण्यैज्योत्स्नाश्रयचंद्रमंडलरूपधारिण्यैअतएवसुखायैसुखदायिन्यैपरमानंदमय्यैवा ८ कल्याण्यैकल्याणकारिण्यैकल्याणगु
णभक्तायैवावृद्ध्यैउपचयकारिण्यैसिद्ध्यैअणिमादिरूपायैकूर्म्यैकूर्मरूपिण्यैकूर्म्यैपदस्यानेकूर्मइतिक्विपापदकल्पितमिति तत्रप्रणताःसंबो

नमोरौद्र्यैनित्यायैगौर्यैधात्र्यैनमोनमः ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः ८
कल्याण्यैप्रणतावृद्ध्यैसिद्ध्यैकूर्म्यैनमोनमः नैरृत्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः ९

नमोनमः कूर्मइत्यपपाठः अन्यत्रकल्याण्यैप्रणताःस्म वृद्ध्यैकूर्म्यैनमोनमइतियोजना अयमेवपाठःसमीचीनइतिप्रतिभाति अन्यथाउपपदविभक्तेःका
रकपदविभक्तिर्बलीयसीतिन्यायेनकल्याण्याइतिद्वितीयोचितेचस्यात् नानमःस्वाहेत्यादिनाचतुर्थी नैरृत्यैअसुरशक्त्यैनिवृत्तेरियंनैरृतीत्य
त्रनियइ निरृतिपदस्यासुरोपलक्षणत्वात् केचित्तुनिरृतिपदंलक्ष्मीवाचकं ततःस्वार्थेअण्लक्ष्मीरूपायैइत्यर्थः भूभृतांपृथिवीधराणांमेर्वादि
पर्वतानांवालक्ष्म्यैश्रियैशर्वाण्यैशिवधर्मिण्यैइंद्रवरुणभवशर्वेत्यादिनाङीषानुगागमौशर्वस्यस्त्रीशर्वाणीत्यर्थःतेतुभ्यं ९

देवीटी. २९

19

दुर्गायै दुरधिगमायै गम्यर्थानां ज्ञानार्थत्वात् दुर्गे संकटे पारयति पालयतीति वा दुर्गं पारः परिच्छेदो यस्याः देशकालाद्यनवच्छिन्नत्वादिति वा दुर्गं
संसारात्पारयति पारं करोतीति वा समस्तेभ्यो दुर्गेभ्यः पारभूता वा दुर्गपारा तस्यै सारो बलं तद्योगित्वात् सर्वश्रेष्ठायै वा सर्वकारिण्यै सर्वजनने स्वतं
त्रायै सर्वकारणशीलायै वा सर्वकारिणीति ख्यातिप्राणः संबोधनरूपत्वे हे सर्वकारिणि दुर्गादिरूपायै तुभ्यं सततं नमः इति योजनीयं ख्याति
र्यथार्थज्ञप्तिः प्रकृतिपुरुषविवेकज्ञानं तद्रूपायै वा कृष्णायै कृष्णायै कृष्णवर्णायै धूम्रवर्णाभधारिण्यै १० ब्रह्मविद्यारूपं संसारतापोच्छेदहेतुः अति
रौद्रं संसारहेतुभूतमविद्यात्मकं च रूपं यस्याः सा अतिसौम्यातिरौद्रा तस्यै नताः संतो नमो नमः कुर्म इत्यध्याहारः नता इति पदस्यानेन नमः पदं क्रियते इत्यपतेः ज
गत्प्रतिष्ठायै जगदधिष्ठानरूपायै देव्यै देवशक्त्यै कृत्यै समस्तपोयागादिक्रियारूपायै एवमुक्तनामप्रसिद्धायै देव्यै मानसो वाचिकः कायिकः प्रणाम

दुर्गायै दुर्गपारायै सारायै सर्वकारिणि ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १० अतिसौम्यातिरौद्रायै नमस्तस्यै नमो नमः नमो जग
त्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १२ ॥ ॥

स्त्रिविध उक्तः ११ सर्वप्राणिषु या प्रसिद्धा विष्णुमाया मूलविद्या विष्णोरपि मोहनरूपेति किंचित् इति शब्दः स्वरूपप्रदर्शनार्थः शब्दिता सर्वागमेषु प्रति
पादिता तस्यै नमः इत्यन्वयः विष्णुमाया हि सात्त्विकराजसतामसतया त्रिधा भिद्यत इति तत्परामर्शकं तस्यै पदं त्रिरभ्यस्यते नमः पदं तु प्रसादने संभ्रमे वा
पुनः पुनरुच्यते तेन न दोषः उक्तं चापि विषादे विस्मये हर्षे खेदे दैन्ये वधारणे प्रसादने संभ्रमेपि द्विस्त्रिरुक्तं न दुष्यति अथवा त्रिः प्रणामने महाफलमिति त्रि
र्नमस्कारः कायिकवाचिकमानसिकनमस्कारत्रयप्रदर्शनार्थं वा एवमितरत्रापि १२

राम
२९

चेतनंनातःकरणाद्वृत्तिःसर्वलोकेचैतन्यरूपेणाव्यवस्थितात्कथ्यते तस्यैत्रिविधोनमस्कारः १३ बुद्धिरंतःकरणंसदसद्विचारव्यापृता १४ नि
द्रानिरिंद्रियप्रदेशोमनोलयःसर्वेंद्रियाणांविश्रामरूपोभुक्तपीताहारपरिपाकशक्तिरितिकेचित् १५ पार्थिवधातुक्षयकृतोवसादःक्षुद्व्य
वहारकारणंवाक्षुधा १६ छायाशोभाकांतिर्दीप्तिश्छविरित्यभिधानात् शोभात्मिकेतिकेचित्स्थानपाभावरूपेत्यन्ये १७ शक्तिःसामर्थ्यमुत्सा
होवाशिवस्यात्मस्वरूपाशक्तिर्वा १८ तृष्णानात्मीयवस्तुस्वीकारेच्छार्थलिप्साच १९ क्षांतिःशक्तोप्यन्यामपिपरकृतापकारसहनं २० जाति

यादेवीसर्वभूतेषुचेतनेत्यभिधीयते नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १३ यादेवी॰ बुद्धिरूपेण॰ नमस्तस्यै॰ १४ यादेवी॰
निद्रारू॰ नमस्तस्यै १५ यादेवी क्षुधारू नमः १६ यादेवी छायारू नमस्तस्यै १७ यादेवी शक्तिरू नमस्तस्यै १८ यादेवी।
तृष्णारू नमः १९ यादेवी क्षांतिरू नमस्तस्यै २० यादेवी॰ जातिरू नमस्तस्यै २१ यादेवी लज्जारू नमः २२ यादेवी शां
तिरू नमस्तस्यै २३ यादेवी श्रद्धारू नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २५

जगदुत्पादनंअनेकेषुदेहेषुएकाकारव्यवहारसाधनंब्राह्मणत्वादिसामान्यंवाजातिः शुद्धसिद्धासामान्येमालतीगोत्वजन्मरित्यभिधानात्सा एकाकाराभव
तिबुद्धिर्यतःसाभवेज्जातिः २१ लोकव्यवहारपालयित्रीअकार्यनिमित्तमन्यःतःसंकोचोवालज्जाअकरणीयाप्रवृत्तिर्वास्वकार्यविषयज्ञानाद्वीर्वा
२२ अंतरिंद्रियनिग्रहःशांतिः २३ गुरुवेदवाक्योविश्वासःश्रद्धासकलजनेषुसाधारणानुकंपावासाहित्यपरिरतिशयभावानाबुद्धिर्वा तथाचदेवलः।सांगुरवा
ह्यानिसंप्रीतिरर्थिनांदर्शनेदया सत्कृतिस्थानष्टपाचसाश्रद्धापरिकीर्तिता २४

कांतिः कमनीयताप्रतिपादयित्री कुसुमशरश्रीनिशोभा वा तदुक्तं शोभैव तरुस्वमशरेणाघ्रिता कांतिरुच्यते कांतिमेवातिविस्तीर्णां दीप्तिमिच्छं
तिसूर्यादिति २५ लक्ष्मीर्धनादिसंपत्पुराणपुरुषश्रमापिनी वा २६ हानिर्जीविकाप्रवृत्तिर्वा २७ विपन्नावस्थादीनताधृतिः २८ स्मृतिरनु
भवव्यतिरिक्तं ज्ञानं २९ सर्वसत्त्वानुकंपा दया परदुःखपरिहारेच्छा निरुपाधिकेच्छा वा ३० अनाधिगतानामभिलाषस्तुष्टिः समस्तवस्तुष्वनाकांक्षा
वा ३१ अदृष्टार्थसाधनसामर्थ्यं पुष्टिः ३२ देहाधिष्ठात्री ब्राह्मणादिवर्णाभिमानिनी देवता वा ३३ आसमंतादिति प्रत्ययो भ्रांतिः ३४ अखिलेषु

यादेवी कांतिर् नमस्तस्यै २५ यादेवी लक्ष्मीर् नमस्तस्यै २६ यादेवी वृत्तिर् नमः २७ यादेवी धृतिर् नमस्तस्यै २८ यादेवी।
स्मृतिर् नमस्तस्यै २९ यादेवी दयार् नमः ३० यादेवी तुष्टिर् नमस्तस्यै ३१ यादेवी पुष्टिर् नमस्तस्यै ३२ यादेवी मातृर्।
नमः ३३ यादेवी भ्रांतिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३४ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या॥
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ३५ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् नमस्तस्यै ३६ ॥

समस्तेषु भूतेषु प्राणिषु इंद्रियाणां वाक्पाणिपादपायूपस्थाख्यानां कर्मेंद्रियाणां घ्राणरसनचक्षुःश्रोत्रत्वग्मनसां ज्ञानेंद्रियाणां चाधिष्ठात्री प्रवृत्ति
निवृत्तिकारणं तस्यै व्याप्त्यै देव्यै विभवैकस्वभावायै त्रिविधपरिच्छेदशून्यायै ब्रह्मशक्त्यै इत्यर्थः व्याप्तिदेव्यै इति पाठे समस्तजनेषु व्याप्तिर्यस्याः सा चासौ
देवी चेति व्याप्तिदेवी तस्यै ३५ चितिः प्रत्यक्चैतन्यं तद्रूपेण एतत्कृत्स्नं जगद्व्याप्य स्थिता समस्तस्य जगतः सत्तास्फूर्तिप्रदत्वेन तादात्म्यसंबंधेन व्याप्तिरेकेन
न मे भवतीति चेतन्न व्याप्तिः सर्वैरंगीकार्यां अन्यथा तेनान्यमेव धाभावेन सत्तास्फूर्त्योरभावात् शशविषाणतुल्यतास्यादिति भावः ३६

सुरैः देवैः पूर्वंमहिषासुरकालेऽभीष्टसंश्रयात्अभिमतलाभहेतोः अभीष्टसंश्रयेतिपाठेदेवीविशेषणं दिनेषु पूर्वकालेषुप्रतिदिनंवानोऽस्माकं
शुभानिमंगलानिभद्राणिसुखानिशुभानिभद्राणिनिरतिशयकल्याणानिवाभद्रशब्दोत्रउत्कर्षवचनः यथा भद्रंभद्रंवितरभगवन्श्रेयसेमं
गलायेति ३७ सांप्रतंचेदानीमपियाईश्वरीउद्धतैर्दैत्यैस्तापितैरस्माभिर्नमस्यतेस्तूयते भक्त्याविनम्रामूर्तयोयेषांतैः नमस्यतीतिनमोवरि
वश्चित्रङःक्यजितिकर्मणिलट् ३८ एवमुक्तरीत्यास्तवादियुक्तानांदेवानांस्तवाभियुक्तानामितिक्वचित्पाठः तत्रसमीपप्रदेशे। अथवासमस्तार्थ

स्तुतासुरैः पूर्वमभीष्टसंश्रयात्तथासुरेंद्रेणदिनेषुसेविता करोतुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहंतुचापदः ३७ यासां
प्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहंतिनः सर्वापदोभक्तिविनम्रमूर्तिभिः ३८ ऋ
षिरुवाच॥ एवंस्तवाभियुक्तानांदेवानांतत्रपार्वती स्नातुमभ्याययौतोयेजाह्नव्यानृपनंदन ३९ साब्रवीत्तान्सुरान्सुभ्रूर्भ
वद्भिःस्तूयतेऽत्रका शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ४० ॥

षष्ठीदेवेषुस्तवादियुक्तेष्वसत्सुतत्रपार्वतीगंगायास्तोयेस्नातुमभ्याययाविस्मत्तवयः अथवाऽनादरेषष्ठी देवाननादृत्या गतेत्यर्थः। यतःसागंगाशंभो
र्जलमयीमूर्तिःसर्वेषुरपूज्येतिवदंति ३९ शोभनेभ्रुवौयस्याः सातान्सुरानत्रप्रदेशेभवद्भिःकास्तूयतेइत्यपृच्छत् तांतस्याःसुरान्पृच्छंत्याःशरीरकोशात्
अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयात्मककोशात् तालव्यशकारपाठेशरीरावरणात्कंचुकादित्येके शरीरावयवसमुदायादित्यन्ये ४०

समस्तैर्मिलितैः समेतैरितिवापाठः ४१ यद्यस्माच्छरीरकोशाद्विःसृता ततस्तस्मात्कौशिकीतिवं स्वेतास्मालोकेषुगीयते इत्यन्वयः कौशिकातितालव्याद्
वशकारःमूर्धन्यषकारवत: - - - - - - - - - - कुशब्दात् कोषेभवा कौषिकीतिव्युत्पादनेश्शेषादरादिनाभिन्द्यति ४२ सापूर्वंत्वपार्वत्य
पिकृष्णाभूत् ४३ ततोहेतोसंदनंतरंवापरंश्रेष्ठसौदर्यधारयतीमंबिकांकौशिकींचंडोमुंडश्चददर्श ४४ कर्मणायमभिप्रैतिसंप्रदानमित्यत्रक्रि
याग्रहणंकर्तव्यमित्युक्तंतेनक्रियायामभिप्रैतितस्यापिसंप्रदानसंज्ञत्वात् सुंभायेतिसंप्रदानेचतुर्थीआख्यानक्रियया प्राप्यमाणत्वात् ४५

स्तोत्रं समेतान्क्रियते सुंभदैत्यानिराकृतैः दैवैःसमस्तैःसमरेनिसुंभेनपराजितैः ४१ शरीरकोशाद्यत्तस्याःपार्वत्यानिःसृतांबिका कौशिकी
तिसमस्तेषुततोलोकेषुगीयते ४२ तस्यांविनिर्गतायांतुकृष्णाभूत्सापिपार्वती कालिकेतिसमाख्याताहिमाचलकृतालया ४३ ततों
बिकांपरंरूपंबिभ्राणांसुमनोहरं ददर्शचंडोमुंडश्चभृत्योसुंभनिसुंभयोः ४४ ताभ्यांसुंभायचाख्याताअतीवसुमनोहरा काप्यास्तेस्त्री
महाराजभासयंतीहिमाचलं ४५ नैवतादृक्कचिद्रूपंदृष्टंकेनचिदुत्तमं ज्ञायतांकाप्यसौदेवीगृह्यतांचासुरेश्वर ४६ स्त्रीरत्नमतिचार्वं
गीद्योतयंतीदिशस्त्विषा सातुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुमर्हति ४७ यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो त्रैलोक्येतुसमस्तानिसांप्रतं

तादृग्रूपंक्वचिदपिकेनविदपिनदृष्टंएवशब्दोवधारणेनदृष्टमेवेत्यर्थः अपिशब्दस्त्वर्थे ४६ स्त्रीरत्नंरत्नमास्त्री नैसांप्रतंगृहे ४८
त्रजहल्लिंगत्वात्तुसकालिंगत्वेचार्वतिरमणीयमंगयस्याःसा ४७ रत्नानिस्वजातिश्रेष्ठानिमणयोवज्रादयःगजाश्वमादौयेषांतानिवस्तू
निभांतिशोभंते।सांप्रतंतानितेगृहेइतिक्रियाध्याहारेणान्वयः ४८

गजरत्नमुत्तमगजः समानीतः। अर्थात्त्वया पारिजाततनामा तरुः पारिजाततरुरिति मध्यमपदलोपी समासः ४९ विमानं व्योमयानं हंससंयुक्तं हंसैरुह्य-
मानं यद्देवस्य ब्रह्मणो रत्नभूतमासीत्। एतत्त्वया गगने हारि नीतं संनिष्ठति। तादृशस्य विमानस्य नादरेण गगने स्थित्या सम्पद्भिः परमकाष्ठाप्राप्तत्वं
सूचितं कथंभूतं विमानमद्भुतं अथ वा यस्मात्त्वं वरप्राप्तिर्लास्येव वेधसो विमानमिहानीतमित्यनेनाद्भुतमाश्चर्यं ५० महापद्मनामा निधिः कान्ता किंज-
ल्किनी मल्लानकेसरा सुलक्षकेसरकुङ्कुमा वा ददौ। अर्थात्तुभ्यं सर्वदैवाम्लाना नीलपंकजा मिषयस्याः ५१ स्यंदनवरो रथमुख्यः प्रजापतेः ब्रह्मणः दक्षस्येत्यन्ये ५१

ऐरावतः समानीतो गजरत्नं पुरंदरात् पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ४९ विमानं हंससंयुक्तमेतत्तिष्ठति तेंगने रत्नभूतमिहानीतं यदा-
सीद्वेधसोऽद्भुतं ५० निधिरेष महापद्मः समानीतो धनेश्वरात् किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां ५१ छत्रं ते वारुणं गेहे कांचनस्रावि ति-
ष्ठति तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ५१ मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वयाहृता पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ५३ निशुम्भ-
स्याब्धिजाताश्च समस्ता रत्नजातयः वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ५४ एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते स्त्रीरत्नमेषा कल्याणी
त्वया कस्मान्न गृह्यते ५५

उत्क्रान्तिं मरणं ददातीत्युत्क्रान्तिदा हे ईश शक्तिर्भ्रातुः परिग्रहे स्वीकारे परिगृह्यतेऽनेनेति परिग्रहो हस्तस्तत्र वा तिष्ठतीति शेषः ५३ अब्धौ समुद्रे जाता उत्पन्ना यानि
सुम्भस्य नान्यस्येत्यर्थः वाससी परिधानकवरणवस्त्रे अग्निरेव शौचं नैर्मल्यकरणं ययोः अग्निशौचे अग्निना वा शौचं पावित्र्यं ययोः अग्निरिव शौचं ययोरिति वा
अग्निवन्निर्मले भवतः न दह्येते चेत्यर्थः ५४ ते त्वया षष्ठी चतुर्थ्याहितानीति सूत्रेण आदेशविधानात् तृतीयायामपि क्वचिदादेशः तृतीयार्थे भवति रूपकमस्य
यं वा ५५

देवी टी. देव्याइति चतुर्थ्यर्थेषष्ठी देव्याःसमीपेवा ५६ साऽर्थाहेतानिचसर्वे चंडमुंडवचनं ईहंस्तस्य च कार्यं करणीयं लघु शीघ्रं यथा स्यात् ५७ सु
३२ ग्रीवःशैलस्योत्कृष्टप्रदेशे अतिमनोहरे यत्र सा आस्ते तत्र गत्वा ततस्तदनंतरं देवीं श्लक्ष्णां मृदुलकोमलं मनोहरं वा यथा मधुरया मृष्टया गिरा प्राह ५८ त्रैलो
क्ये परमेश्वरस्त्वत्सकाशं त्वत्समीपं प्रेषितः मत्तः इह स्थाने त्वत्सकाशमागत इति काकाक्षिवन्न्यायेन त्वत्सकाशपदस्य उभयत्र योजनं ५९ नव्याहताज्ञाय

ऋषिरुवाच निशम्येति वचः शुंभः स तदा चंडमुंडयोः प्रेषयामास सुग्रीवं दूतं देव्या महासुरं ५६ इति चेति च वक्तव्या सा गत्वा वचनान्मम य
था चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ५७ स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ५८ दूत उ
वाच देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ५९ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु नि
र्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ६० मम त्रैलोक्यमखिलं मम देवा वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि पृथक्पृथक् ६१ त्रैलो
क्ये वररत्नानि मम वश्यान्यशेषतः तथैव गजरत्नं च हृतं देवेन्द्रवाहनं ६२ राम

स्य देवयोनिषु विद्याधरादिषु निर्जिताखिलदैत्यारियो देवास्तेन शृणुष्वाकर्णय ६० वशाः स्वाधीनाः अनुगाः अनुचरास्तान् विधायिनो वा वशानुगाः अनु राम
गाः स्वेच्छया उपाश्नामि समीपे भक्षयामि पृथक्पृथक् इंद्रादिभेदेन ऐंद्रादिरूपाद्वा ६१ अशेषतः अशेषाणि वररत्नानि नानादिग्देशप्रसिद्धानि मम वश्या ३२
नीत्यनुषज्यते कृत्वेत्याद्यग्रिमेण योजनीय ६२ ॥ ॥

उच्चैःश्रवसशब्दोवाचकोस्यास्तीतिमत्वर्थीयाचप्रत्ययेनोच्चैःश्रवसशब्दमकारांतंआकाशस्थैर्दिवौकैसैरितिहारिवंशस्थदिवौकसशब्दंवदुच्चैःश्रवसंज्ञाशब्देन
बहुव्रीहिर्जर्वतितन्मंदंमत्वर्थीयाच्प्रत्ययेनैवबहुव्रीह्यर्थस्यलब्धत्वात्॥ तस्मात्पृषोदरादित्वाद्वोदसत्वाद्वाकारांततौ अश्वरत्नंदेवेंद्रेणाद्दत्तत्वादेवंशातं
चारयित्वा ऽस्मनोरक्षार्थममरैः प्रणिपत्यसमर्पितमित्यन्वयः ६३ रत्नभूतानिवस्तूनिपानिमय्येवशामानिभूतानिस्थितानिहेशोभनेशोभनदेहे ६४
अस्मदोर्द्वयोश्चैकस्मिन्नपिस्युर्भवयमितिबहुवचनं अन्यात्तुरसाहित्येनवाउपागच्छाश्रय ६५ भजाश्रयउरुर्विक्रमोविक्रमातिशयभाजं चपलस्व

क्षीरोदमथनोद्भूतमश्वरत्नंममामरैः उच्चैःश्रवससंज्ञंतत्प्रणिपत्यसमर्पितं ६३ यानिचान्यानिदेवेषुगंधर्वेषूरगेषुच रत्नभूतानिभूतानि
तानिमय्येवशोभने ६४ स्त्रीरत्नभूतांत्वांदेविलोकेमन्यामहेवयं सात्वमस्मानुपागच्छयतोरत्नभुजोवयं ६५ मांवाममानुजंवापिनिशुंभ
मुरुविक्रमं भजत्वंचंचलापांगिरत्नभूतासिवैयतः ६६ परमैश्वर्यमतुलंप्राप्स्यसेमत्परिग्रहात् एतद्बुद्ध्यासमालोच्यमत्परिग्रहतांव्रज ६७
इत्युक्तासातदादेवीगंभीरांतःस्मिताजगौ दुर्गाभगवतीभद्रायेयेदंधार्यतेजगत् ६८ श्रीदेव्युवाच सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्त्व
योदितं त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापितादृशः ६९ ॥

भावोऽपांगोयस्याःवैप्रसिद्धौ ६६ प्राप्स्यसेइत्यात्मनेपदंपरस्मैपदित्वाद्धातोःसंगतेनथार्थंतर्भावितण्यर्थत्वात्कर्मकर्तर्यात्मनेपदे मयात्वमैश्वर्यंप्रापयितव्यासीत्यर्थः
मत्परिग्रहात्मदाश्रयणात्॥ एतद्बुद्ध्यातःकरणेनसमालोच्यविचार्यमत्परिग्रहतांममपत्नीत्वं ६७ गंभीरश्चांतःअभ्यंतरेस्मितमीषद्धास्यंयस्याजगौउवाच
भगवतीश्वर्यमाहात्म्यातिशयतात्रयमत्यंतोत्कर्षप्रतिपादनाय ६८ अत्रस्यानेगुणवर्णनेवामिथ्याकिंचित्त्वोदितमितिसत्यतायादार्ढ्यप्रतिपाद्यते ६९

देवी टी·
३३

33

किंचिदितिवाक्यांतरारंभेअत्रस्थानेपरिग्रहेवावक्तंकल्पितंतन्मिथ्याकथंक्रियतेअपितुनक्रियतेइत्यर्थःअल्पबुद्धित्वादितिपरिहासोक्तिः ७० काचित्प्रतिज्ञेत्याकां
क्षायामाह संग्रामेयोमामितिअनेनप्रकारेणजयतिअभिभवतिसंग्रामे बलदर्पवद्दर्पाभिमानंशमयतिप्रतिबलःसमानसामर्थ्यःपूर्वपूर्वाभावेसतीतिभावः
७१ तत्तस्मादत्रशुंभआगच्छतुविवाहंकरोतुकिंचिरेण विलंबेनालंलघुमनोसंपद्यास्यात् ७२ हेदेवित्वमवलिप्तागर्वितास्यन्यथावादर्पश्रुतासिमम

किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा ७० योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति योमेप्रति
बलोलोकेसमेभर्ताभविष्यति ७१ तदागच्छतुशुंभोत्रनिशुंभोवामहासुरः मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु ७२ दूतउवाच॥।
अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः त्रैलोक्येकःपुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः ७३ अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि ति
ष्ठंतिसंमुखेदेविकिंपुनःस्त्रीत्वमेकिका ७४ इंद्राद्याःसकलादेवास्तस्थुर्येषांनसंयुगे शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसंमुखं ७५ राम

अग्रतःएवंमाब्रूहित्रैलोक्येशुंभनिशुंभयोःपुरःकःपुमांस्तिष्ठेन्नकोपीत्यर्थः ७३ हेदेविसंग्रामेसर्वेदेवाअन्येषामपिदैत्यानांसंमुखेनतिष्ठंतित्वमेकास्त्रीकिं
पुनःकिंभणसेएकिकाएकाकिनीउत्साहयांस्वार्थेवाकः ७४ येषांशुंभादीनांसंग्रामेइंद्राद्याःसकलादेवानतस्थुःतेषांस्त्रीसंमुखीकथंप्रयास्यसि ७५ राम
३३

सात्वंमयैवोक्तासतीशुंभनिशुंभयोः समीपंगच्छपश्चात्केशाकर्षणेननिर्धूतंगौरवंयस्याःसामागमिष्यसिअपितुगमिष्यस्येव ७६ एवमेतदित्यु
पहासोक्तिः एतत्त्वदुक्तंएवमेवसत्यमेवशुंभोबलिष्ठः निशुंभश्चापिबलवान्नेवपरंतुकिंकरोमियस्मान्मयाप्रतिज्ञागर्विष्ठाविहिताः ७७ यद्यस्मा
दाहृतः सयत्नः सन्मयायद्युक्तंएतत्सर्वमादितोमूलादारभ्यासुरेंद्रायकथयसचयद्युक्तंतदिष्टंकरोत्वित्यन्वयः ७८ इतिश्रीपरमहंसरामाश्र

सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवामागमिष्यसि ७६ श्रीदेव्युवाच एवमेतद्बलीस्वंभोनिशुंभश्चा
पितादृशः किंकरोमिप्रतिज्ञेयंयदनालोचनात्कृता ७७ सत्वंगच्छमयैवोक्तंयदेतत्सर्वमाहृतः तदाचक्ष्वासुरेंद्रायसचयुक्तंकरो
तुतत् ७८ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदूतसंवादोनामपंचमोध्यायः ५ ऋषिरुवाच इत्या
कर्ण्यवचोदेव्याःसदूतोमर्षपूरितः समाचष्टसमागम्यदैत्यराजायविस्तरात् १ तस्यदूतस्यतद्वाक्यमाकर्ण्यासुरराट्ततः सक्रो
धःप्राहदैत्यानामधिपंधूम्रलोचनं २ हेधूम्रलोचनाशुत्वंस्वसैन्यपरिवारितः तामानयबलाद्दुष्टांकेशाकर्षणविह्वलां ३

मविरचितायांदेवीमाहात्म्यटीकायांपंचमोध्यायः ५ सदूतोदेव्याइतिवचश्चाकर्ण्यअमर्षपूरितःकोपव्याप्तःसमागम्यदैत्यराजायविस्तरात्समाचष्ट
कथितवान् १ असुरराट्शुंभस्तस्यदूतस्यतद्वाक्यमाकर्ण्यक्रोधयुक्तःसन्दैत्यानामधिपंसेनानाथंधूम्रलोचननामानमब्रवीत् २ हेधूम्रलोचनत्वं
शीघ्रंस्वसैन्यपरिवारितःसन्बलात्तांदुःशीलांकेशाकर्षणेनाकुलीकृतांआनय ३

देवीमा
३४ ३५

तस्याः परित्राणं ददाति एवंभूतो यदि कश्चिदपरः उत्तिष्ठते समीहते उद्यतः सज्जी भवति स हंतव्यः अमरो यक्षो गंधर्वो वा मवकृतदोर्ध्वकर्मणोत्या
त्मनेपदे ४ ततोनंतरं स धूम्रलोचनो दैत्यस्तेन शुंभेनादिष्टः सन् असुराणां सहस्राणां षष्ट्या वृतो द्रुतं सत्वरं चचाल ५ स धूम्रलोचनः तां हि
माद्रिशिखरे वर्त्तमानां दृष्ट्वा उच्चैः स्वरेण गाढमिति जगाद उच्चैः हे देवि त्वं शुंभनिशुंभयोः समीपं प्रयाहि मूलमात्यंतिक श्रेष्ठं स्थितिनामथायना
रे ६ चेद्यदि भवती प्रीत्या मम स्वामिनः समीपं नायास्यसि ततः एषोहमिति सावलेपोक्तिः अद्येदानीमेव बलात्त्वां केशाकर्षणविह्व

तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेपरः सहंतव्योमरो वापि यक्षो गंधर्व एव वा ४ ऋषिरुवाच तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो
धूम्रलोचनः वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ५ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां जगादोच्चैः प्रयाहीति मू
लं शुंभनिशुंभयोः ६ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ततो बलान्नयाम्येष केशाकर्षणविह्वलां ७ श्रीदेव्युवा
च दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः बलान्नयसि मामेवं ततस्ते किं करोम्यहं ८ राम

लानयामि एतच्छब्दप्रयोगेन यामीत्युत्तमः पुरुषः यदुक्तं अस्मद्वदः क्वचिद्वेवमेतल्लिंगविभाषया वैय्याकरणमाणिक्यमवदद्भोहितीपतिः राम
।पश्यतां धर्विनां वापं सर्वेषां नरपुंगवाः आदाय वेणी रत्नमेष गच्छामि लीलया ७ हे हंत त्वं दैत्येश्वरेण शुंभेन प्रेषितो बलवान् सामर्थ्य ३४
वान् बलमौरसं सैन्यमुक्तः विशेषणाद्वयं सोपहासं यदि मां बलात्कारेण त्वं नयसि तत् किं करोमि किमपि कर्तुं न शक्नोमि त्वां हनिष्यामीति भा
वः इति ८

सोऽसुरो धूम्रलोचनो देव्योक्तो देवीं प्रति धावति स्म ततः साम्बिका हुंकारेणैव तं भस्म चकारेत्यन्वयः भस्मसादिति पाठे भस्मस्वरूपमित्य-
र्थः ८ महासैन्यं सेनासमुदायः कर्तनसायकैः शरैः शक्तिभिः परश्वधैः कुठारैश्च कर्मभूतां देवीं ववर्ष अथ धूम्रलोचने भस्मीकृते सातिक्ष्ण-
विदंबिकेति शेषमांतपादः १० ततोऽनंतरं देव्या वाहनः कोपात्कंपितकेसरः पपात प्रविवेश स्ववाहनो देव्याः इति नाहनः। बहुलोक्तेः कर्मणि तिल्युरस्व

ऋषिरुवाच इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ८ अथ क्रुद्धं महासैन्यमसुरा-
णां तथांबिका ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः १० ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं पपातासुरसेनायां सि-
हो देव्याः स्ववाहनः ११ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् आक्रम्य चाधरेणान्यान्स जघान महासुरान् १२ केषांचित्पा-
टयामास नखैः कोष्ठानि केसरी तथा तलप्रहारेण शिरांसि कृतवान्पृथक् १३ विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे पपौ च रु-
धिरं कोष्ठादन्येषां धुतकेसरः १४

अनन्यमाधारेणोवाह नः आननवदित्यानुषंत्वे ११ अधरेणाधरकायेनाक्रम्यातिक्रम्यातिक्रम्य आक्रान्त्याधरेणो निष्कासितस्यादः तेनाधरकायेनघ्ना-
क्रान्तिस्तथा जघानेत्यर्थः १२ कोष्ठानि हृदयमध्यानि तदुक्तं कोष्ठं कुक्षौ कुशूले च मंदिराभ्यंतरेऽपि नितद्वति केसरी सिंहः तलप्रहारेण तलप्र-
हारेण तलो विस्तृतांगुलिः करः १३ कोष्ठादिति ल्यब्लोपे पंचमी उदरं विदार्य तत्र रुधिरं पीतवानित्यर्थः १४

महात्मनामहोत्साहेन १५ देव्यातंनिहतंदेव्याःसिंहेनसमस्तंसैन्यंक्षयितंचश्रुत्वाक्षयितमितितारकादित्वादितच अथवाक्षयंकारो
नीत्यर्थेणिच ततोनिष्ठा॥तौप्रवेशितौ १७ गच्छतइतिच्छंदोनुरोधाद्वस्वारलोपः यत्नयाहाद्विन्वेएवबहुवचनंगौरवप्रतिपादनायअत्र
केवाइतराक्षुरसाहित्येनवागच्छतमितिवापाठः १८ केशेष्वितिकेशाकर्षणंकृत्वाबद्ध्वावासमानीयतामितिशक्लनेनेनसंबंधः वः युधि

क्षणेनतद्बलंसर्वंक्षयंनीतंमहात्मना तेनकेसरिणादेव्यावाहनेनातिकोपिना १५ श्रुत्वातमसुरंदेव्यानिहतंधूम्रलोचनं॥
बलंचक्षयितंकृत्स्नंदेवीकेसरिणाततः १६ चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिताधरः आज्ञापयामासचतौचंडमुंडौमहासुरौ
१७ हेचंडहेमुंडबलैर्बहुभिःपरिवारितौ तत्रगच्छतगत्वाचतांसमानीयतांलघु १८ केशेष्वाकृष्यबद्ध्वावायदिवःसंशयो
युधितदशेषायुधैःसर्वैरसुरैर्विनिहन्यतां १९

बहुवचनंसर्वत्रयाख्येयंवायितिवापाठः यदिवोयुष्माकंयुधिसंग्रामविषयेप्रायोजेतुंनशक्येतिसंशयस्तदाक्रमशोस्त्रप्रक्षेपादि
युद्धधर्मंपरित्यज्यअशेषैः समस्तैरायुधैःसर्वैरसुरैर्मिलित्वाविनिहन्यतांनाश्यतां १९ ॥ ॥

तस्यां हतायां ताडितायां सत्यां यदि सा न्हता स्यात् तदा तां गृहीत्वा शीघ्रमागम्यतां यदि न मृता स्यात् तदा तां बद्ध्वा गृहीत्वा शीघ्रमाग
म्यतामित्यन्वयः अथवा समानीयतामित्यादिना बंधनपूर्वकमानयनमुक्तं यदीत्यादिना शीघ्रमागम्यतामित्यनेन हननपक्ष उक्तः
तयोः श्रेयानित्याकांक्षायां पूर्वोक्तो बंधनपूर्वकानयनपक्ष एव श्रेयानिति निवारयितुमाह बद्ध्वा गृहीत्वा तामिति अथवा हननधातुराव
गत्यर्थः। तथा चाशेषायुधप्रहारवशाद्धतायां भूमौ गतायां तस्यां तां गृहीत्वा बद्ध्वा शीघ्रमागम्यतामित्यर्थः अस्मिन्पक्षे बद्ध्वा समानीय

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकां २०
इति श्रीमार्कशावनिके मन्वंतरे देवीमाहात्म्ये धूम्रलोचनबधो नाम षष्ठोऽध्यायः ६

तामित्युक्ते युद्धमध्ये कथं सा बंधनीयेति यदि वः संशयस्तदा शेषैरित्यादिना बंधनोपयोगि हननं बंधनोपायत्वेनोपदिश्यते तत्र शराणां वियो
गपर्यवसायितयेति मंतव्यं अथ यदि वः संशय इत्येवमथशब्दो योजनीयः चेत्तु बंधनपूर्वकानयन---देहवता---तत्राप्यसामर्थ्ये
पुनर्बद्ध्वानयनं पक्षांतर---दुष्टानिति वदंतितन्मंदं बंधना---येषां हननमुद्दिष्टं हननेप्यसमर्थानां हननात्कठिनत्व---नोपदेश
स्यव्यर्थत्वात् २० इति श्रीदेवीमाहात्म्यटीकायां षष्ठोऽध्यायः ६

ततो नंतरं चंडमुंडौ पुरोगमौ येषां ते दैत्या आदिष्टाः संतो पञ्चः प्रतस्थिरे कीदृशाः गजतुरगरथपदातिरूपं चतुरंगं बलं तेनोपेता उद्यतायुधा अथो ईषद्धासां
१ शैलेंद्रस्य हिमाचलस्य शृंगे सिंहस्योपरि व्यवस्थितां स्थितां मित्यन्वयः कांचनस्य सुवर्णस्येदं कांचनं तस्मिन् विकारार्थे ऽणि प्रत्ययः शृंगस्य विशेषणमिति
मयडेवस्यान्नच्छाद० २ ते दैत्यास्तां दृष्ट्वा समादातुं उद्यमं चक्रुः उद्यताः अन्ये हि तस्याः समीपे गच्छंति ३ ततः पश्चादंबिका तानरीन्प्रति उच्चै

ऋषीरुवाच आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः चतुरंगबलोपेता ययुरभ्युद्यतायुधाः १ ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां सिं
हस्योपरि शैलेंद्रशृंगे महति कांचने २ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ३ ततः को
पं चकारोच्चैरंबिका तानरीन्प्रति कोपेन चास्या वदनं मषीवर्णमभूत्तदा ४ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतं काली कराल
वदना विनिष्क्रांतासिपाशिनी ५ विचित्रखट्वांगधरा नरमालाविभूषणा द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ६ अतिवि
स्तारवदना जिह्वाललनभीषणा निमग्नारक्तनयना नादापूरितदिङ्मुखा ७

रत्यर्थं कोपं चकार तदा स्या वदनं कोपेनांजनाभमासीत् ४ तस्या देव्या भ्रुकुटीकुटिलात् ललाटफलकाद्द्रुतं खड्गपाशधरा कराली नाम देवी
तत्क्षणं विनिर्गता ५ किंभूता देवी विचित्रखट्वांगधरा खट्वांगमायुधविशेषः नरहारयतीति नरशब्देन पुरुषशिरांसि उच्यंते तेषां माला विभूषणं य
स्याः सा द्वीपिचित्रकः चर्म परीधानं वासः स्थाने यस्याः सा शुष्कमांसेन त्वगस्थिमात्रेणातिमहारौद्रा ६ निमग्ने गंभीरे आरक्ते नेत्रे यस्याः सा नादेन क्ष्वे
शरितानि दिङ्मुखानि यया सा ७

साकालिकामहासुरान्भ्रमयंती सती तत्रासुराणां दैत्यानां सैन्यवेगेन शीघ्रमभिपतिता यत्तचोरादिकः पतित्वा तद्बलमभक्षयत् ९ पार्ष्णि
ग्राहः पाश्वगाः पार्श्वनिषण्णः अंकुशग्राहः योधाः सनतनिषण्णः योधिभिर्हस्त्यारोहिभिः सहघंटाभिः समन्विता वारणाने करहस्तेन मुखे क्षिप
त् ९ तथैव तेन प्रकारेण योधं मनुष्यं तुरंगैः सह रथं सारथिना सह वक्त्रे निक्षिप्य तानि भयानकं यथा स्यात्तथा चर्वयंती सती केषुकं सा
जग्राहेति संबंधः क्वचिच्चर्वयन्त्यतिभैरवमिति पाठः तत्र वक्त्रे निक्षिप्य दशनैश्चर्वयतीति संबंधः वर्तमाननिर्देशात् भूतवदर्थो गंतव्यः चर्वितं

सावेगेनाभिपतिता घातयन्ती महासुरान् सैन्ये तत्र सुरारीणामभक्षयत तद्बलं ९ पार्ष्णिग्राहांकुशग्राहयोधघंटासमन्वितान् समादाये
करहस्तेन मुखे चिक्षेप वारणान् १० तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवं ११ एकं जग्राह केशे
षु ग्रीवायामथ चापरं पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् १२ तैर्मुक्तानि च शस्त्राणि तथास्त्राणि महासुरैः मुखेन काली जग्राह
दशनैर्मथितान्यपि १३

वतीश्च चर्वयदिति वा चर्वयतीति पाठस्तु शुद्ध इति भाति ११ अपरं च ग्रीवायां केशे जग्राह चरणाघातेनान्यमाक्रम्य वक्षसान्यमपोथयत् ता
डितवती पोथ हिंसायां योधं तुरंगैरित्यत्र योधमित्येकवचनं जात्यभिप्रायेण क्वचित्तु तथैव योधास्तुरगैरित्यादौ बहुवचनांतः पाठः क्वाचित्कः
कल्पित इवाभाति १२ शस्त्राणि शरादीनि अस्त्राणि शरादीनि अस्त्राणि समंत्राणि ब्रह्मास्त्रादीनि मुखेन कृत्वा सा प्रथमं जग्राह देवी पश्चात्क्रुद्ध
या रुषा क्रोधेन कराभ्यां दंतैर्मथितानि १३

दु॰मा॰ ऽसादेवीबलिनांदुरात्मनांबलंसर्वंनिष्पिपेषखड्गोदयत्युन्मत्तानभक्षयत् अन्यानताडयत् १४ केचिदसुरादेव्याखड्गेनद्विधाकृताः केचित्खट्वांगगता
३१ डिताःसंतः केचिद्दंताग्राभिहताश्चविनाशंजग्मुः १५ किंबहुनातदसुराणांबलंदुर्गयाल्पेनकालेननिपातितंतयंनीतहष्ट्वाचंडस्तांकालीम
तिभयानकाकृतिमभिदुद्राव अभिमुखंवेगयोधावतिस्म १६ छिन्नैःपतितैःस्वकेमुंडस्तांछादयामासेत्यन्वयः कुत्रचिन्मुंडच्छिन्नैरित्येकंपदं तत्रमुं
डनामासुरेणाछिन्नैःछादयामास अर्थात् ॥ मुंडः अथवामुंडशराछिन्नाःप्रकृष्टंछादयामासेत्यर्थः सहस्रशइतिसंख्यैकवचनात्ववीप्सायामितिशस्

बलिनांतद्बलंसर्वमसुराणांदुरात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा १४ असिनानिहताःकेचित्केचित्खट्वांगताडिताः जग्मु
र्विनाशमसुरादंताग्राभिहतास्तथा १५ क्षणेनतद्बलंसर्वमसुराणांनिपातितं दृष्ट्वाचंडोभिदुद्रावतांकालीमतिभीषणां १६ शरवर्षैर्म
हाभीमैर्भीमाक्षींतांमहासुरः छादयामासचक्रैश्चमुंडःक्षिप्तैःसहस्रशः १७ तानिचक्राण्यनेकानिविशमानानितन्मुखं बभुर्यथार्क
बिंबानिसुबहूनिघनोदरं १८ ततोजहासातिरुषाभीमंभैरवनादिनी कालीकरालवदनादुर्दर्शदशनोज्ज्वला १९

१७ तस्यादेव्यामुखंप्रविशमानानिसंतिबभुः शुशुभिरेघनोदरंमेघाभ्यंतरंबहूनांरविबिंबानांघनोदरेएकदाप्रवेशःकदापिनसंभवतीतिकारणाद श्रम
भूतोपमेयं १८ भीमंभयंकरंयथास्यात्तथातिरुषाअतिक्रोधेनजहासभैरवंभयानकंनदितुंशीलंयस्याःसाकरालंवदनंतस्यास्तेमध्येदुर्द राम
र्शोदशनाःतैरुज्ज्वला अंतःशब्दस्यमध्यवाचित्वमत्रार्थादुक्तं अंधकारनिकरस्फुरत — दशनपालिर्शतिभासमानचंद्रकलांकुरविषदाभगव ३१
तीदुर्दर्शेऽतिरवलच्चाम्ययोति १९

महासिंहं महारवइं उत्था योऽयम्पहासिनि रोषोक्तः प्रकारः अथवा हंहन्तुं तैरुक्तो वर्णो नाशः उक्तं च भाष्यकारेण वर्णागमो वर्णविप
र्ययश्च द्वौ चापरौ वर्णविकारनाशौ धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तमिति अस्य चंडस्य शिरः केशेषु गृहीत्वा तेन
श्वैर्यते नासिना सिनाछिनत् केचित्तु महासिंहे उत्थायारूढेति वदंति तन्मंदं एवं सत्युक्तस्यासेः तेनासिनेति तच्छब्देन परामर्शस्यानु
पपद्यमानत्वात् येनासिना सहललाटफलकाद्भुतत्रस्ताभ्यामिनेति तच्छब्देन परामर्शसमर्थ्यते तदपि मंदं अतिव्यवहितस्य तच्छब्दे

उत्थाय च महासिंहं देवी चंडमधावत गृहीत्वा चास्य केशेषु शिरस्तेनासिनाछिनत् २० अथ मुंडोऽभ्यधावत्तां दृष्ट्वा चंडं निपातितं।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा २१ हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं २२

न परामर्शायोगात् कालपाः सिंहो वा हननमेव न भवति अतोऽस्याः सिंहारोहणोक्तेः समर्थयितुमशक्यत्वाच्च अत एव महासिंहमुत्थाप्येति अंत
र्भूतण्यापि केषांचिद्व्याख्यानमनुपपन्नमिति अथवोत्थायोद्यमं कृत्वा देवी चंडमधावत् कथंभूते महासिंहमिव विक्रमशालिनमिति रूपकेण
निर्देशः उपमेवातिरोभूतभेदा रूपकमिष्यते इति महासिंहे इति पाठः महासिंउत्थाय महा इति कृत्वा २० निपातितं अर्थात् दृष्ट्वा तमप्यपातयद्भूमौ सा
खड्गाभिहतं रुषेति क्वचित्पाठः तेन सा खड्गेन हत्वाऽपातयदित्यर्थः २१ चंडं महावीर्यं मुंडं च विनिपातितं दृष्ट्वा ततो हतशेषं भयेन व्याकुलं सद्दिशो

मुंडमेव चेत्यत्र मुंडशब्देन मुंडस्य मुंडमवयवलक्षणयोच्यते प्रचंडोऽट्टहासो महासः तेन मिश्रं संयुक्तं यथा स्यात्तथाभ्येत्य प्रचंडाट्टहासमि
श्रं चंडिकां प्राह २३ अत्र युद्धयज्ञे इत्यन्वयः महापशू इति रूपकातिशयेन तौ उपहारीकृतौ २४ तौ चंडमुंडौ महासुरौ आनीतौ दृष्ट्वा क
ल्याणी कल्याणकारिणी चंडिका ललितं सविलासं काली देवी प्रत्युवाच २५ चंडं च मुंडं च इत्यत्र अवयवलक्षणया चंडमुंडयोः शिरसी उच्यते।

शिरश्चंडस्य काली च गृहीत्वा मुंडमेव च प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां २३ देव्युवाच मयात्तावत्रोपहृतौ चंडमुंडौ महापशू ॥
युद्धयज्ञे त्वयं शुंभं निशुंभं च हनिष्यसि २४ ऋषीरुवाच तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ उवाच काली कल्याणी चंडिका ल
लितं वचः २५ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो लोके ख्याता देवि भविष्यसि २६ इति श्रीमार्कंडेयपुराणे सा
वर्णिके मन्वंतरे देवीमाहात्म्ये चंडवधो नाम सप्तमोध्यायः ७ ऋषीरुवाच चंडे च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु
क्षयितेष्वसुरेश्वरः १ ततः कोपपराधीनचेताः शुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह २

चामुंडेति प्रसिद्धा देवी त्वं २६ इति श्रीदेवीमाहात्म्यटीकायां सप्तमोध्यायः ७ तुल्ययोगिताख्यातिपादनार्थं चकारद्वयं बहुलेषु सैन्येषु तयोर
र्थात् क्षयितेषु क्षितिनारकादित्वादितच् अथवा क्षयशब्दात्तत्करोतीति तदाचष्टे इति णिच् ततो निष्ठा १ कोपपराधीनं स्वतंत्रं चेतो यस्य स कोपप राम
राधीनचेताः प्रस्थानि वा दैत्यानां यानि सर्वाणि सैन्यानि तेषामित्यन्वयः सर्वसैन्यानामिति दैत्यानां वा विशेषणं उद्योगमुद्यममादिदेशाज्ञवाशेहेति ३८
पादपूरणे १

सर्वबलैः सहितादैत्यानिर्यांतु षडशीतिः प्रधानभूताउदायुधाः उद्यतास्त्राः कंबूनांकंबुनाम्नि दैत्यकुलेजातानां चतुरशीतिः चतुर्भिरधिकाशी
तिः चतुराशीतिरितिपाठेआ‒‒र्षिकार्थः कुलानीत्यत्रापिसंबध्यतेसिंहावलोकन्यायेनअथवाकंबूनांहस्तिनां
दैत्याहस्तियोद्धारइत्यर्थः तदुक्तं कंबुस्याद्वरवगजयोः ३ कोटिवीर्याणिकोटिवीर्यकुलोद्भवानिद्दूंलादानिकुलानिधौम्राणांधूम्रवंशभवानां
४ कालकाः कालवंशजाः कालकनामानोवादौर्हृदाः दुर्हृदवंशजाः दौर्हृतादृतिपाठेदुर्हृतेरपत्यानिदुर्हृतकुलसंभवावामौर्यामुरवंशजाः

अथसर्वबलैर्दैत्याः षडशीतिरुदायुधाः कंबूनांचतुराशीतिर्निर्यांतुस्वबलैर्वृताः ३ कोटिवीर्याणिपंचाशदसुराणांकुलानिवै शतं
कुलानिधौम्राणांनिर्गच्छंतुममाज्ञया ४ कालकादौर्हृदामौर्याः कालकेयास्तथासुराः युद्धायसज्जानिर्यांतुआज्ञयात्वरितामम ५
इत्याज्ञाप्यासुरपतिः शुंभोभैरवशासनः निर्जगाममहासैन्यसहस्रैर्बहुभिर्वृतः ६ आयांतंचंडिकादृष्ट्वातत्सैन्यमतिभीषणं ज्यास्वनैः पू
रयामासधरणीगगनांतरं ७

कालकेयाः कालकायाअपत्यानिस्त्रीभ्यढक्‌सज्जाः सन्नाममयीकाः सन्नद्धाःत्वरिताः सन्तः निर्यांत्वाज्ञयेत्यत्रसं
धिर्नभवतिअविवक्षितत्वात् ५ असुरपतिः शुंभोदैत्यइत्यादिरूपस्त्वयंबहुभिर्महद्भिःसैन्यसहस्रैर्वृतः महांतिसैन्यानिसेनासमुदायास्तेषांसहस्रैः
भैरवमुग्रंशासनमाज्ञायस्यदारुणादेशः ६ आयांतमागच्छंतंशुंभंदृष्ट्वाकिंभूतंतत्सैन्यंवाशब्दःयस्यसःतत्सैन्यस्तंतत्सैन्यंअथवाआयांतंशुंभंतत्सैन्यंच
दृष्ट्वेतिचकाराध्याहारेणयोजनीयंआयातमितिपाठेयापापणोइत्यस्मात्‌शतृप्रत्ययेनुंमकेभावेक्तः धरणीगगनयोरंतरंमध्यंज्यागुणानिनादैरोदसीपूरयामा

दुर्गाटी० सद्यःपूर्वमनेकवारमित्यर्थः ७ अंबिका चातितां सिंहश्चातीव नादानुपबृंहयदवर्धयत् हृदि हृष्टो इति छंदस्यमाङ्योगेपीति छांदसः अडागमाभावः
३९ ८ धनुर्ज्येति स्वभावख्यापनमात्रं व्यपदेशेनैव क्षेत्रगुणाः प्रतीतेः धनुर्ज्यादीनां निनादैरापूरितं दिशां मुखं यया सा निनादैर्निजनादैः भीषणैः शत्रुभ
यानकैर्जिग्ये जितवती नादानित्यव्ययः आत्मनेपदं छांदसं अथवा नादापूरितदिङ्मुखापि काली देव्या धनुर्ज्यासिंहघंटानां निनादैर्जिग्ये इति
39 कर्मणि आत्मनेपदं ९ ततः काली विस्तारितानना अत्यंतभीषणैर्निनादैः जितामिति ज्ञेयं धनुषः सिंहस्य घंटानां च निनादैः पूरितदिङ्मुखं यया सा
१० वतस्तुणां क्षितिं समाहारस्थलं दिशं आबद्धा दिशाशब्दात् साधनीयम् अन्यत्र चतुर्दिगिति स्यात् दिक्षु विदिक्षु वेत्यर्थः सरोषैः सक्रोधैः दैत्यसैन्यैर्दे

ततः सिंहो महानादमतीव कृतवान्नृप घंटास्वनेन तं नादमंबिका चोपबृंहयत् ८ धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा निनादैर्भी
षणैः काली जिग्ये विस्तारितानना ९ तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशं देवी सिंहस्तथा काली सरोषैः परिवारिताः १० एतस्मिन्नंतरे
भूप विनाशाय सुरद्विषां भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपै

वा सिंहः परिवारितो वेष्टितः काली त्वपरिवारितेति लिंगव्यत्ययेन योज्यं परिवारितोपि क्वचित्पाठः सरोषैरिति स्यानेश ॥ चंडिकां ययुः १२ राम
रोधे शिष्टिः क्वचित्पाठः ११ हे भूप एतस्मिन्नंतरे अवसरे समरे समये दैत्यानां विनाशाय अमरसैन्यानां भवाय उदयाय अमरसिंहानाम् अमरश्रेष्ठानां भवाय संपदे राम
च ईशः शिवः गुहः कार्तिकेयः विष्णुशब्दोत्र वराहनरसिंहावपि संगृहीतौ तेजः सामर्थ्यान्विताः स्वाव्यतिरेकिण्यो देवताः ब्रह्मादीनामेव शरीरेभ्यः स ३९
काशाद्विनिष्क्रम्य तद्रूपैर्ब्रह्मादिसदृशाकारैरेव साहाय्यार्थं चंडिकां भगवतीं ययुः ११ एतदेव प्रकटयन्नाह॥

यथाभूषणावाहनं भूषणावाहनानतिक्रमेणेत इत तथाविधायस्य ब्रह्मादेर्यादृशं रूपं भूषणं यच्च वाहनं तत्सर्वं धृत्वा निपघनस्यश
क्तिरसुरान्योद्धुमाययावित्यर्थः १३ नदेवव्याकरुते अग्रेतुपरिस्त्रह्व सूत्रं जपमालिका ब्रह्माणं त्रिनितिगच्छतीतिब्रह्माणीधातृनाम

यस्यदेवस्ययद्रूपं यथावाहनभूषणं तद्वदेवहितच्छक्तिरसुरान्योद्धुमाययौ १३ हंसयुक्तविमानस्थासाक्षसूत्रकमण्ड
लुः आयाताब्रह्मणः शक्तिर्ब्रह्माणीसाभिधीयते १४ माहेश्वरीवृषारूढात्रिशूलवरधारिणी महाहिवलयाप्राप्ताचन्द्र
लेखाविभूषणा १५ कौमारीशक्तिहस्ताचमयूरवरवाहना योद्धुमभ्याययौदैत्यानंबिकागुहरूपिणी १६

नेकार्थत्वात्कर्मण्यपिणोब्रह्माणी १४ वरशब्दःश्रेष्ठवचनः महाहीमहासर्पौ अनंततक्षकौ कंकणौ यस्याः साप्राप्ताभवत् १५ कौमा
रीशक्तिः अंबिका विश्वमाता कार्त्तिकेयरूपधराशक्तिर्हस्ते यस्याः प्रहरणार्थं अभ्यः परेनिष्प्रासम्योऽप्रधानमयूरारूढा दैत्यान्योद्धुम
भ्याययौ १६

देवीटी॰
४०

यत्तु वाराहं यज्ञेनोपलक्षितं वाराहं तदुक्तं वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपा इति हरेर्या शक्तिः
स्वरूपः वाराही वराहाकारं शरीरं धारयन्ती शंखः पाञ्चजन्यः चक्रं सुदर्शनं गदा कौमोदकी शार्ङ्गं शृङ्गविकारभूतं धनुः धनुष्मसा हस्तयोर्दक्षिणोपरि
हस्तयोः खड्गो नन्दकः एते हस्तेषु यस्याः ननु वैष्णव्याः शक्तेश्चतुर्भुजत्वात् कथं षडायुधधारकत्वेन षड्बाहुत्वमुच्यते इति चेन्न वामपुराणादस्याः षड्बा
हुत्वसम्प्रतीतेः तथा च श्रूयते बाहुभ्यां गरुडारूढा शंखचक्रगदासिना शार्ङ्गबाणधराजातालैष्णवी रूपशालिनी बाहुभ्यामिति षड्भ्याम्

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ १७ यज्ञवाराहमतुलं रू
पं या बिभ्रती हरेः शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुं १८

ननु दाक्षबाहुत्वमन्यथा षड्बाहुत्वे अष्टबाहुत्वपक्षे खड्गसाहचर्याच्चर्मेहिनमपि न विरुध्यते तथाप्येकबाहुरिक्तत्वे दोष इति चेन्न माहेश्वर्यादावेकायु
धधारिकत्वोक्तेः परबाहुरिक्तत्वस्यादोषत्वात् नंगीकारात् अथवा शार्ङ्गस्य शब्दः शोभनवचनः खड्गविशेषणं तथा योऽयमस्तथा च त्वावर्यवायुधानी
तिचतुर्बाहुत्वं न विरुध्यते शोभने षड्नुषि शार्ङ्गस्वानके चगदेन तथेत्युत्पलिनी अथवा शृंगशब्दो बदेनवाचकः तथा च तद्विकारभूतश्शृङ्गः आवर
णोशं वा शार्ङ्गस्तद्युक्तः अथवा धनुर्युक्तः खड्ग एकस्मिन्करे १८

राम
४०

नारसिंही शक्तिर्नरसिंहस्य सदृशं शरीरं बिभ्रती सटानां केसराणां स्कंधदेशं चलानां चक्षुः समंतात् यः क्षेपः प्राक्षेपेण ताडनेन वातेन क्षिप्ता इतस्ततः
पातिता येरिता वा नक्षत्राणां संहतिः प्रकरो यया सा १९ तथैंद्री शक्तिर्वज्रायुधधारिणी ऐरावतगजपृष्ठे स्थिता नेत्रसहस्रवती यथा देवेंद्रस्तथैवेंद्रू
पधारिणी आगता २० ईशानो महादेवो देवशक्तिभिर्ब्रह्माण्यादिभिः समभिः परिवृतो वेष्टितो मम प्रीत्या कृत्वा असुरा हन्यंतामिति चंडिकां कौशि

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्ता तथैवेंद्री गजराजोपरि स्थिता प्राप्ता सहस्रन
यना यथा शक्रस्तथैव सा २० ततः परिवृतस्ताभिरीशानो देवशक्तिभिः हन्यंतामसुराः शीघ्रं मम प्रीत्याह चंडिकां २१ ततो देवीशरीरात्तु
विनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्रा शिवाशतनिनादिनी २२ सा चाह धूम्रजटिलमीशानमपराजिता दूतत्वं भगवन् गच्छ पार्श्वं
शुंभनिशुंभयोः २३

कीमाहोक्तवान् २१ ततः कौशिकीशरीरात् चंडिकाशक्तिस्तस्या द्वितीया मूर्तिरत्युग्रा चंडिकातोपि शत्रुशमनादौ प्रचंडा शिवानां शृगालीनां नि
नादो यस्यां सेतीति अथवा शिवस्य कल्याणस्य आ समंतात् शतानि नादः अ संख्याशब्दो अस्यामस्तीति तथा २२ सापराजिता विष्णुशक्तिः ईशाने
प्याह धूम्रवर्णजटाशालिनं हे तो वार्त्ताहरत्वेन द्रावो हे त्वं तत्र गच्छ शुंभनिशुंभयोः गच्छ गच्छेति काकाक्षिवदुभयत्र संबध्यते २३

गत्वा त्वं शुंभनिशुंभौ चातिगर्वितौ दानवौ ब्रूहि वदतौ चान्ये तत्र दानवाः शुंभनिशुंभान्तिके ये अन्ये तांश्च ब्रूहि २४ हे दैत्याः त्रैलोक्यमिंद्रो लभतां देवा
यज्ञभागभुजो भवंतु यूयं पातालं च यात अथ नराह्यमी गच्छत यदि जीवितुमिच्छथ अन्यथा जीवितं नास्ति २५ बलगर्वाद्वलवीर्यादिकाद्यचेद्भवंतो यु
द्धकांक्षिणो वर्त्तते अथ युद्धेन प्रयोजनं तत्त्यो गच्छत तन्त्यी गमनं किं न सेत्स्यति वो युष्माकं पिशितेन मांसेन मच्छिवा मम तत्त्वगा नित्या शक्तयस्तृप्यं

ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः २४ त्रैलोक्यमिंद्रो लभतां देवाः संतु हविर्भुजः यू
यं प्रयात पातालं यदि जीवितुमिच्छथ २५ बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः २६
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयं शिवदूतीति लोकेस्मिंस्ततः सा ख्यातिमागता २७ तेपि देव्या वचः श्रुत्वा शिवाख्यातं
महासुराः अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता २८

नु २६ तया देव्या शिवो महेश्वरः स्वयं दूत्येन दूतत्वकरणेन दूतकर्मणा वा दूतवतिर्ह्यं वेत्ति यत्प्रत्ययेन यद्यपि दूत्यमित्येव भवति तथापि ब्राह्मणादि राम
त्वात्ष्यञ्प्रहितः ततः सा देवी कालीअस्मिंल्लोके शिवो दूतो यस्याः सा शिवदूतीति बहुव्रीहेस्त्रांनोदात्तत्वादिति ङीप् अथवा शिवं दूतं करोतीति राम
णिच् वृत्तिं अंतात्कर्मण्यण् ततो ङीप् २७ तेपि स्तंभादयो महासुराः शिवेन कथितं देव्या वचः श्रुत्वा कोपाविष्टास्तत्र जग्मुः यत्र कात्यायनी गौरी ४१
देहजा स्थिता २८

ततश्चमरारयोदेवारयोदैत्याश्चाग्रेसमुत्थिता प्रथममादौशरशक्तीनांऋष्टीनामेकधारासीनांवृष्टिभिस्तांदेवींचववर्षुरितिच्छांदसोगुणः व
वृषुरित्यपिक्वचित्पाठः अहतामर्षाश्चात्यंतक्रुद्धाः २९ सादेवीतैरस्तैर्क्षारबाणान्शूलशक्तिपरश्वधान्ध्मातेसशब्देयद्धनुःतेनमुक्तैः टीकारोधनु
षःशब्दःआकर्णमाकृष्टकार्मुकचापच्युतैर्बाणमहेषुभिर्लीलयानिरकृन्तत ३० तस्याःकौशिक्याश्चयतः तस्याश्चयतइत्यत्रभोभगोइत्यादिनायत्वेलोपः
शाकलस्येतियलोपस्यसंधिंप्रत्यसिद्धत्वंयद्यपितथाप्यार्षःसंधिः अथवातस्यतुभस्यायतः तस्यास्तथायतः इतिपाठस्तुकात्यायनीकःपोथि

ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवीममरारयः २९ साचतान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान्
चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथाकालीशूलपातविदारितान् खट्वांगपोथितांश्चारीन्कुर्वतीव्यच
रत्तदा ३१ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणीचाकरोच्छत्रून्येनयेनस्मधावति ३२

तान्मारितान्वाकुर्वतीसतीव्यचरत्कुर्वतीत्यत्रनुमागमश्छांदसः — — राहृतिगणत्वात्करणार्थःकुर्वधातुर्भ्वादिकःतस्येदंरूपमित्यन्ये
कुर्वतीतिपाठःकात्यायनीकः ३१ कमंडलुजलाक्षेपैर्हतंवीर्यंयेषांते — — — — — — — — — — णिचकर्मणाम् ३ येनयेनप्रदेशे
नकल्यादिभ्यस्तृतीयाधावतिस्मेतियोगेऽतीतेपिलटाब्रह्माणीयेनयेनप्रदेशेनमार्गेणधावतितेनतेनशत्रूनकारोविधांसुसतेजसोकरो
[illegible]नेतिसर्वत्रयोजनीय ३२

दुर्गा टी० ऐंद्रीवज्रप्रहारेणाविदारिताः सहस्रसंख्यादितिजवनुजा रुधिरस्यौघप्रवाहं वर्षन्तीत्येवंशीलाः पृथ्व्यामपतन् ३३ केचित्तुंडप्रहारेणापोत्र
४२ घातेन विध्वंसिताः स्फाडिताः केचित् दंष्ट्राग्रेणाहतं विदारितं वक्षो येषां ते ३४ नारसिंहीशक्तिरन्यान्काश्चिन्महासुरान्नखैः स्फाटितांश्च भ
यन्ती संग्रामे विचचार सन्नादेनापूर्णौ दिगाकाशौ यया ३५ चंडा उत्कटाः सकोपा वा अट्टहासा महान्तश्च ये हासास्तैः शिवदूत्याभिदूषिताः सर्वे

ऐंद्रीकुलिशपातेन शतशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३३ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः वाराहमू
र्त्या न्यपतंश्चक्रेण च विदारिताः ३४ नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् नारसिंही चचाराजौ नादापूर्णदिगंबरा ३५ चंडाट्टहा
सैरसुराः शिवदूत्याभिदूषिताः पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सासुरान् ३६ इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् दृष्ट्वाभ्युपा
यैर्विविधैर्नेशुर्देवारिसैनिकाः ३७ पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३८ राम

तोऽभीषिताः सन्तः पृथ्व्यां पेतुः पतितांस्तांश्च शिवदूती नारसिंही काली चखादाभक्षयत् ३६ इत्यनेन पूर्वोक्तेन प्रकारेणाविविधैरभ्युपायैर्जलप्र
क्षेपणादिभिर्महासुरान्हिंसन्तं मातृगणं दृष्ट्वाऽसुरसेना पाशमुख्या नेशुरदर्शनं प्राप्ताः पलायिता इत्यर्थः ३७ मातृगणेनार्दितान्पीडितान्पला राम
यनपरान्दृष्ट्वा रक्तबीजो महासुरो योद्धुमभिमुखमाययौ देव्या अर्थात् ३८ ४२

अस्य रक्तबीजस्य समुत्पतन्त्युत्तिष्ठन्ति मेदिन्यामित्यधिकरणे सप्तमी पंचम्यंतपाठे ल्यब्लोपे पंचमी मेदिनीमाश्रित्योत्तिष्ठंतीत्यर्थः समुत्पन्नोर
तौ रक्तबिंदोरेव प्रकृतित्वेन मेदिन्याः प्रकृतित्वाभावान्नापादानत्वं स रक्तबीज एव प्रमाणं यस्य तदा तत्प्रमाण एव ३९ ततः स महासुरो गदा
पाणिः सन्निंद्रशक्त्या सह युयुधे ततश्चैंद्री स्ववज्रेण रक्तबीजं निजघ्ने ४० आशु शीघ्रं ४१ तस्य रक्तबीजस्य शरीराद्यावंतो रक्तबिंदवः पति
तास्तावंतः पुरुषास्तद्वीर्याज्जाताः तद्वद्रक्तबीजवद्वीर्यं प्रभावस्तेजो वा बलं सैन्यं शारीरं वा विक्रमः सामर्थ्यातिशयस्तद्यस्मत्स्वयेषां ते ४२ ते चापि रक्त

रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ३९ युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ततश्चैं
द्री स्ववज्रेण रक्तबीजमताडयत् ४० कुलिशेनाहतस्याशु बहु सुस्राव शोणितं समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ४१
यावंतः पतितास्तस्य शरीराद्रक्तबिंदवः तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ४२ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः समं
मातृभिरत्युग्रशस्त्रपातातिभीषणं ४३ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ४४

बीजसंभवाः पुरुषाः शक्तिभिः समं सह अत्युग्रमत्युत्कटं यथा स्यात्तथा यः शस्त्रपातस्तेनातिभयानकं यथा स्यात्तथा युद्धं चक्रुः ४३ ववाह सुस्राव
संप्रसारणाभावश्छांदसः वहगतावित्यस्य रूपं वा वहः प्रयत्ने इत्यस्य वा धातूनामनेकार्थत्वात् संप्रसारणं तु वहप्रापणे इत्यस्यैव यजादित्वात्।
प्राप्नोति नान्यस्य तथा च रक्तं ववह इत्याह वदतीव शरीराद्वेगेन निर्गच्छतो रक्तात् ववह इत्याकारः शब्दो भवतीत्यर्थः ततो रक्तात्सहस्रशः असंख्याः पुरु
षा जाताः ४४

समरे रणे तमसुरेश्वरं चक्रेणाभिजघान गदया ताडयामास च कथंभूतं ऐन्द्र्याः इन्द्रशक्तेः सकाशात् इतं गतं अथवा तन्मुल्लकृते एकस्मिन्ने
नेकस्य शस्त्रसंपातः संभाव्यते ऐन्द्र्यापि गदया तं ताडयामास अथवा गदयेत्युच्यते अनयेति गदा वज्रं तया ताडयामास ऐन्द्रीत्यविवक्षित
त्वान्न संधिः ४५ अस्य वैष्णवीशक्तिभिन्नस्य सतः रुधिरस्रावसंभवैः सहस्रशः सहस्रेण सहस्रेणेत्यर्थः संख्यैकवचनाद्वीप्सायामिति शस
सहस्रसंख्याकैस्तत्प्रमाणैर्महासुरैर्विश्वं व्याप्तं ४६ कुमारः कार्त्तिकेयस्तस्येयं कौमारी शक्तिः शक्त्या तं जघान तथा वाराही असिना तं हन्ति स्म

वैष्णवी समरे चैनं चक्रेणाभिजघान ह गदया ताडयामास ऐन्द्री तमसुरेश्वरं ४५ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः सहस्रशो जग
द्व्याप्तं तत्प्रमाणैर्महासुरैः ४६ शक्त्या जघान कौमारी वाराही च तथासिना माहेश्वरी त्रिशूलेन रक्तबीजं महासुरं ४७ स चापि गद
या दैत्यः सर्वा एवाहनत्पृथक् मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ४८ तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि पपात
यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ४९

माहेश्वरीशक्तिस्तं त्रिशूलेनाहनत् ४७ अहनत् जघान हन्तेर्लङि शपो लुकि कृते अहन् इति निष्पद्यते यद्यपि तथापि छान्दसः शपो लुगभावः अ
थवा हन् पथा स्नेति तुरोदिपादात् आहन् तर्हि साध्यामित्यस्माद्धि कल्याणि जेतास्मि चोद्रूपं शप्प्रत्यये सति लङि ४८ तस्य रक्तबीजस्य बहुधा शक्ति
शूलादिभिराहतस्य सतः यो रक्तौघो भूमौ पपात तेन शतशः असुरा उत्पन्ना बभूवुः ४९

तैरक्तबीजस्यरुधिरसंभूतैरसुरैःसकलंविश्वंव्याप्यतेस्म ततस्तदनंतरंअसुरैर्जगद्व्यापनाद्धेतोर्वाउत्तममत्युत्कृष्टंनिरतिशयंभयमाजग्मुः ५०
प्रकर्षेणहन्यतेहननंप्रक्रियतेवेतिप्रहारैणास्तत्रसत्वराप्राङ्गुंपरतोहंतेभ्यःप्रत्ययेसतिप्राहइतिनिष्पद्यतेरथेनकांचनांगेनशयपयोप्राहल्लाल
सःइतिस्कंदपुराणोपिप्राहल्लालसःसंग्रामल्लालसएवोच्यते अतएवाचेत्यस्यनपुनरुक्तिः अथवासुरान्दृष्ट्वातेषांप्रोत्साहनार्थंप्राहसतप्रकर्षेण
हृष्टासंक्रान्तवती त्वरान्वितावतीअर्शआद्यिभ्योच् अथवात्वरान्वरंत्वरयेत्यर्थःनैरुक्तोवर्णनाशः किंवंतानतीयावाःएवाभयाकुलान्सुरान्दृ
ष्ट्वाचंडिकाप्राहस्वभातेङ्गने ततःसत्वरासतीविस्तारितंवदनंकुर्विति कालीमुवाचेतियोज्यं विस्तृतंविततंविस्तीर्णंवदनमितिक्वचित्पाठः ५१

तैश्चासुरासृक्संभूतैरसुरैःसकलंजगत् व्याप्तमासीत्ततोदेवाभयमाजग्मुरुत्तमम् ५० तान्विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा उवाच
कालीचामुंडेविस्तीर्णंवदनंकुरु ५१ मच्छस्त्रपातसंभूतान्रक्तबीजान्महासुरान् रक्तबिंदून्प्रतीच्छत्वंवक्त्रेणानेनवेगिना ५२

रक्तबिंदून्रुधिरविप्रुषोरक्तबिंदोर्जातान्महासुरान्वक्त्रेणप्रतीच्छगृहाणेत्यन्वयः रक्तबिंदोरितिजात्यपेक्षयैकवचनंजातानित्यपादानपंचम्याहि
यते जायमानमहासुरप्रकृतिर्वाच्यरक्तबिंदोर्जनिकर्तुःप्रकृतिरित्यनेनापादानत्वंअथवारक्तंबिंदुश्चेतनेयस्यसरक्तबिंदुःरक्तबीजउच्यतेरक्त
बिंदुरितिकारणत्वाद्वारक्तबीजएवरक्तबिंदुशब्देनोच्यतेकारणेकार्योपचारात्तस्यरक्तबिंदुर्वक्त्रेणप्रतीच्छकथंभूतान्महासुरान्कारणत्वात्
अनेनभयानकत्वाप्रसिद्धेनवेगिनात्वरावतीसती ५२

दुर्गा० महत्क्षतात्रक्तबिंदुजातान्नक्षयंतीसतीरणोचरविचर एवमनेनप्रकारेणाक्षीणरक्तःसन्नेषक्षयंगमिष्यति नचोत्पत्स्यंतीतिपरस्मैपदंछांदसं
८४ ५३ देवीचंडिकातांकालीमित्युक्त्वाततःशूलेनतंरक्तबीजमवधीत् ततःकालीचामुंडारक्तबीजस्यशोणितंवक्त्रेणप्रतीच्छतिस्मजगृहे इत्युभय
पदित्वादात्मनेपदं ५४ ततोहेतोरसौरक्तबीजस्तत्रसमयेयुद्धेवाऽथानेनतरंगदयाचंडिकामाहतवान्सगदापातोस्याश्चंडिकायाश्चल्पिकामपि
लोकमपिवेदनांपीडांनचक्रेगदाल्पयानाल्पापि ५५ तस्यरक्तबीजस्ययस्माद्देहात्देहांगात्ततस्माद्देहागात् तच्छोणितंवक्त्रेणहत्वासंश्रय

एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्यति भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे ५२ ऋषिरुवाच इत्युक्त्वातंततोदेवीशूले
नाभिजघानतं मुखेनकालीजगृहेरक्तबीजस्यशोणितं ५४ ततोसावाजघानाथगदयातत्रचंडिकां नचास्यावेदनांचक्रेगदापा
तोल्पिकामपि ५५ तस्याहतस्यदेहात्तुबहुसुस्रावशोणितं यतस्ततस्तद्वक्त्रेणचामुंडासंप्रतीच्छति ५६ मुखेसमुद्गतायेस्यारक्त
पातान्महासुराः तांश्चखादाथचामुंडापपौतस्यचशोणितं ५७ ॥

च्छतिददातिअर्थात्आत्मनेपदंचामुंडासंप्रतीच्छतीतिपाठेगृह्णातीत्यर्थः अथवायतःकारणाद्देहात्शोणितंसुस्रावततोहेतोःतच्छोणितंवक्त्रे राम
णसंप्रतीच्छतीतियोज्यं यतोगच्छत्तस्येतिकेचित् ५६ समुद्गताजाताःनतुरक्तस्यभूमौपातेसतिअसुराजायंतेकथंतस्यामुखेऽसुरसंभवइ ४४
तिचेन्नमुखेपिपार्थिवांशस्यविद्यमानत्वेनदोषाभावात् अन्यायमानासुराभिप्रायेणातानितिबहुवचनंरक्तबीजाभिप्रायेणतस्येत्येकवचनं
५७

असिभिरित्यादिज्ञातोबहुवचनंऋष्टिभिरेकधारखड्गैः ५८ हेमहीपालस्वरथेत्वामंत्रणंमहीपृष्ठेशस्त्रसंघसंघसमाहतः
सन्नीरक्तोश्वत्वापपातदेव्याः शस्त्राणिदेवतास्वरूपत्वाच्छास्त्राणिस्वरूपाणिभवंति तेनसंघसार्थोनुजंताबेवप्रयुज्येतेइतिकथमचेतनेषुसं
घशब्दप्रयोगइत्यपिनशंकनीयंसंघइवासंघः ५९ तेषांत्रिदशानांसंबंधितयाजातोमातृगणः अथवातेषांत्रिदशानांमध्येसृग्मदोद्धतो

देवीशूलेनवज्रेणबाणैरसिभिऋष्टिभिः जघानरक्तबीजंतंचामुंडापीतशोणितं ५८ सपपातमहीपृष्ठेशस्त्रसंघसमाहतः
नीरक्तश्चमहीपालरक्तबीजोमहासुरः ५९ ततस्तेहर्षमतुलमवापुस्त्रिदशानृप तेषांमातृगणोजातोननर्तासृङ्मदो
द्धतः ६० इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येरक्तबीजवधोनामाष्टमोध्यायः ८ राजोवा
च विचित्रमिदमाख्यातभगवन्भवतामम देव्याश्चरितमाहात्म्यंरक्तबीजवधाश्रितं १

जातोननर्तेत्यन्वयः अथवातेषामसुराणामसृग्भिर्मदस्तेनोद्धतइत्यन्वयः असिन्नक्षेसमर्थः ष्टकृशाह्लस्यानित्यसापेक्षकात्वा ६०
इतिश्रीदेवीमाहात्म्यटीकायामष्टमोध्यायः ८ इदंदेव्याश्चरितस्यचेष्टितस्यमाहात्म्यमोदार्यंविचित्रंनानाप्रकारंआश्चर्यकंरंआख्यातंकथि
तं यद्वाचरितचेष्टितंमाहात्म्यंप्रतापातिशयः तयोःसमाहारोरक्तबीजवधाश्रितं १

1850

४५

साभिन्ने रक्तबीजे निपातिते सति शुंभो निशुंभश्चातिकोपेन यत्कर्म चकार तत्पुनरपि श्रोतुमिच्छामि १ रक्तबीजे निपातिते सति संग्रामे अन्येषु धूम्रलोच
नादिषु च हतेषु सत्सु शुंभो निशुंभश्चातुलं कोपं चकार ३ महासैन्यं हन्यमानं विलोक्य क्रोधमुद्वहन् अभ्यधावत् निशुंभस्त्वं ययो अपि शब्दः समुच्चयार्थः
मुख्यया प्रधानभूतया दैत्यसेनया सह तु पलक्षितो वा ४ तस्य निशुंभस्याग्रे पृष्ठे च पार्श्वयोश्च महासुराः देवीं हंतुं समीपमाजग्मुः क्रुद्धा अत्यंत सरोषा

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते चकार शुंभो यत्कर्म निशुंभश्चातिकोपवान् २ ऋषिरुवाच चकार कोपमतुलं रक्तबी
जे निपातिते शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ३ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभोपि मुख्ययासु
रसेनया ४ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः संदष्टौष्ठपुटाः क्रुद्धा देवीं हंतुमुपाययुः ५ आजगाम महासैन्यः शुंभोपि
स्वबलैर्वृतः निहंतुं चंडिकां कोपात्कृत्वा युद्धं च मातृभिः ६ ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः शरवर्षमतीवोग्रं मेघयोरि
ववर्षतोः ७ राम

अतएव कोपेन संदष्टोष्ठपुटो यैस्ते ५ शुंभोपि स्वसैन्यैर्वृतः सन् कोपाच्चंडिकां निहंतुमाजगाम मातृभिः सह युद्धं कृत्वा चंडिकां प्रत्याययौ ६
एकत्वाद्देव्याः देव्या इत्येकवचनं शुंभनिशुंभयोर्द्वित्वात्तयोर्द्विवचनं देव्येति तृतीयांतपाठे सहार्थं तृतीया सहशब्दयोगेपि — — — ७ राम०

४५

चंडिका ताभ्यामसुराभ्यां क्षिप्तान् देवी स्वशरसङ्घैः चिच्छेद शरौघैः शुंभनिशुंभौ अङ्गेषु हस्तपादादिषु च जघान ८ निशितं दन्तदारणं चर्मफलकं शोभ
नाप्रभायस्य तत् आदाय देव्या वाहनोत्तमं सिंहं मूर्ध्नि ताडयामास ९ वाहने सिंहे ताडिते सति देवी चंडिका निशुंभस्योत्तममसिं क्षुरप्रेणास्त्रविशेष
णाष्टचंद्रवाणविशेषेण वा तथा च प्रयोगः दशाननं द्विभिरक्षुरप्रखंडितशीर्षं तेनाशु शीघ्रं अष्टौ चंद्रकाः चंद्रकाकाराः रचनाविशेषा यत्राष्ट

चिच्छेद तांश्शरांस्ताभ्यां चंडिका स्वशरोत्करैः ताडयामास चाङ्गेषु शरौघैरसुरेश्वरौ ८ निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं
ताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ९ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकं १० छिन्ने च
र्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां ११ कोपाध्मातो निशुंभोऽथ शूलं जग्राह दानवः आ
यातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् १२

र्मशस्त्राभरणं चाच्छिनत् १० साऽथ देवी तामपि शक्तिमभिमुखमागतां चक्रेण द्विधा खंडं कृतवती ११ अथ शुंभः कोपेन प्रज्वलितः शूलं जग्राह
देवी मुष्टिप्रहारेण शूलोऽस्त्रीति द्विलिंगत्वेन शूलशब्दस्याभिधानेष्वग्रहीतत्वात् आयातं मुष्टिपातेनेति पाठः पुंलिंगे शूलशब्दाभिप्रायेण
तिज्ञेयं शूलं तमथायांतं चूर्णीचकारेत्यर्थः १२ श्री

आविध्यभ्रामयित्वाआटविभ्रर्वस्यअर्जवीतिवीभावेहस्रेयेवर्णयोर्दधीवेव्योरितियोगविभागादीकारलोपेन्पंअथवाशूलस्यचूर्णकृतत्वान्नआविध्या
थसमंताद्भ्रामयित्वा गदामतिचिक्षेपआविध्येतिपाठेताडयित्वेत्यर्थः देव्याकर्त्री
शूलेनकारणेनाभिन्नाभस्मत्वमागताभस्मत्वंगतेत्यर्थः देव्यास्त्रिशूलेनषष्ठ्यागयाद्देवीत्रिशूलेनेत्येकपदपाठेकर्त्तरितृतीया १३ ततस्तंदैत्यपुंगवं

आविध्याथगदांसोपिचिक्षेपप्रतिचंडिकां सापिदेव्यात्रिशूलेनाभिन्नाभस्मत्वमागता १३ ततःपरशुहस्तंतमायांतंदैत्यपुंगवं।
आहत्यदेवीबाणौघैरपातयतभूतले १४ तस्मिन्निपतितेभूमौनिसुंभेभीमविक्रमे भ्रातर्यतीवसंक्रुद्धःप्रययौहंतुमंबिकां
१५ सरथस्थस्तदात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषंनभोबभौ १६ तमायांतंसमालोक्यदेवीशंखमवाद
यत् ज्याशब्दंचापिधनुषश्चकारातीवदुःसहं १७

दैत्यपुंगवंपरशुंहस्तेयस्यसः तंबाणौघैराहत्यभूतलेऽपातयतपातयामासमणिचश्लेत्यात्मनेपदं १४ तस्मिन्भीमविक्रमेभ्रातरिनिसुंभेभूमौ
निपतितेसतिसुंभोऽतीवक्रुद्धोंबिकांहंतुंप्रययौससुंभस्तदारथस्थउद्धिकोत्कलहगाप्रकारेणात्युत्कृष्टेणत्वपरमास्त्रैर्निहतमेरशेषमाका
शंव्याप्यभातिस्मतदात्युच्चैरित्यपिक्वचित्पाठः १६ तंसुंभमायांतमालोक्यदेवीशंखंवृश्रयामासधनुषश्चज्याशब्दमतीवदुःसहंचकाररवंच
कार १७

समस्तदैत्यसैन्यानां ककुभो दिश इत्यर्थः याः उद्दिश्य दैत्यसैन्यानि स्थितानि ता दिशो विजयघंटास्वनेन पूरयामासेत्यर्थः तेजोवधविधायिनां ते
जोवधकरणशीलानां तेजोवधविधायिनेति पादेस्वनविशेषणं १८ ज्याजितादिभ्यानांमदायैः गगनमाकाशं गां पृथिवीं दश दिशश्चापूरयामास एव
उपदिशोपि दशव्याप्ताइत्यर्थः दिशामिवोपदिशामपि दशसंख्यापरिच्छेदः ननु दिशो दशैव वर्त्तन्ते किं दशग्रहणेनेति चेत् उच्यते अप्रयोह्यनयान्ते
वर्त्त दिश इत्युक्ता का दशेत्याकांक्षायामुपदिश इति योज्यं उपदिक्सहिता दिश इति मध्यपदलोपी समासो वा १९ ततोनन्तरं कालीवाक्समुत्पत्य

पूरयामास ककुभो निजघंटास्वनेन हि समस्तदैत्यसैन्यानां तेजोवधविधायिना १८ ततः सिंहो महानादैस्त्याजितेभमहामदैः पूरयामास ग
गनं गां तथैव दिशो दश १९ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः २० अट्टाट्टहासमशि
वं शिवदूती चकार ह तैः शब्दैरसुरास्त्रेसुः शंभुः कोपं परं ययौ २१ दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा तदा जयेत्यभिहितं देवैरा
काशसंस्थितैः २२

उत्पतनं कृत्वा कराभ्यां गगनं क्ष्मां चाताडयत् तेन ताडनशब्देन शब्दाः पूर्वं समुत्पन्नास्ते सर्वे तिरोधानं नीताः २० अथ शिवदूती काली अट्टहासं उ
च्चैर्हि समशिवं भीषणं रौद्रं चकार तैरट्टाट्टहासशब्दैः असुरास्त्रस्ताः उद्विग्नाः शुंभोत्यर्थं कोपं ययौ क्रुद्धो जातः २१ अंबिका यदा दुरात्मं
स्तिष्ठ तिष्ठेति कोपि वीक्ष्य इत्युक्तवती तदाकाशसंस्थितैर्देवैर्जय देवीत्यूचे २२

शुंभेनागत्ययाशक्तिःक्षिप्तासतीज्वालावदतिशयेनभीषणाघोरोद्राग्निचयतुल्या आयांतीसतीउल्कायानिपातेननिराकृताप्रशमितत्वादं
विकपा २३ लोकत्रयस्यभूर्भुवःस्वर्लक्षणास्यांतरंमध्यंशुंभोलोकइतियावत्तच्चवनिपतेहेसुरथनिर्घातनिःस्वनउत्पातध्वनिर्जितवा
नर्थात्सिंहनादंमात्रगणास्पनिर्घातध्वनिनाशुंभस्यासिंहनादोभिभूतइत्यर्थः अथवाभावेक्तः।जितंपराजयंनेअभिभवोस्यास्तीति
जितवान्पराजयवानभिभववानपराभूतइत्यर्थः अर्थात्सिंहनादेनकर्मणितिवाछांदसःक्तवंतुःसिंहनादेनोत्पातध्वनिर्विजितइत्यर्थः अ

शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा आयांतीवह्निकूटाभासानिरस्तामहोल्कया २३ सिंहनादेनशुंभस्यव्याप्तंलोकत्र
यांतरे निर्घातनिःस्वनोघोरोजितवानवनीपते २४ शुंभमुक्ताञ्छरान्देवीशुंभस्तत्प्रहिताञ्छरान् चिच्छेदस्वशरैरुग्रैःशतशो
थसहस्रशः २५ ततःसाचंडिकाक्रुद्धाशूलेनाभिजघानतं सतदाभिहतोभूमौमूर्छितोनिपपातह २६ ततोनिशुंभःसंप्राप्यचे
तनामात्तकार्मुकः आजघानततोदेवीकालींकेसरिणंतथा २७

थवासिंहनादेनसहितउत्पातध्वनिःसंपूर्णलोकत्रयांतरंपरिभूतवानित्यर्थः २४ देवीश्रीचंडिकाशुंभमुक्ताञ्छरांश्चिच्छेदशुंभोदेव्याप्रहिता
शराञ्छतसहस्रसंख्याकैर्बाणैरच्छिनत् २५ साचंडिकाक्रुद्धासतीशूलेनतंशुंभमताडयत् सशुंभस्तेनशूलेनाभिहतःसंमूर्छांप्राप्तो
विवेतानिपपात २६ ततःशुंभपतनानंतरंश्छेनानंतरंवानिशुंभश्चेतनांसम्यक्प्राप्यकार्मुकमादायदेवींचंडिकांकालींशिव
देवींकेशरिणंवाहनवार २७ राम
एम
५७

पुनरपिदनुजेश्वरःशुंभःसहस्रसंख्याकान्बाहून्कृत्वाचक्रायुधेनचंडिकांछादयामास २८ दुःखेनाप्यतेज्ञायतेस्यास्तत्त्वमितिदुर्गातिशपिता
आर्त्तिः॥छ॥ अथवादुर्गसंकटेऽरिसमुद्रादौयाआर्त्तिस्तांनाशयतीदुर्गार्त्तिनाशिनीकर्त्तरिल्युट्इतनोडीप्नाशिनीतिपादेनाछील्येणिनिः २९
ततोनन्तरंनिशुंभोवेगेनगदामादायदितिजपतिनापरिवृतःचंडिकांहंतुमुपाद्रवत् ३० तस्याभिमुखमागच्छतएवशीघ्रंतीक्ष्णधारेणगदांवि

पुनश्चकृत्वाबाहूनामयुतंदनुजेश्वरः चक्रायुधेनदितिजश्छादयामासचंडिकां २८ ततोभगवतीक्रुद्धादुर्गादुर्गार्त्तिहारिणी।चिच्छेद
तानिचक्राणिस्वशरैःसायकांश्चतान् २९ ततोनिशुंभोवेगेनगदामादायचंडिकां अभ्यधावतवैहंतुंदैत्यसेनासमावृतः ३० तस्यापतत
एवाशुगदांचिच्छेदचंडिका खड्गेनशितधारेणसचशूलंसमाददे ३१ शूलहस्तंसमायांतंनिशुंभममरार्दनंहृदिविव्याधशूलेनवेगाविद्धे
नचंडिका ३२ भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः महाबलोमहावीर्यस्तिष्ठेतिपुरुषोवदन् ३३ तस्यनिष्क्रामतोदेवीप्रहस्यस्वन
वत्ततः शिरश्चिच्छेदखड्गेनततोसावपतद्भुवि ३४ ॥

च्छेदततोनिशुंभःशूलंजग्राह ३१ देवनिसूदनंनिशुंभंशूलहस्तमागच्छंतंदृष्ट्वावेगभ्रामितेनशूलेनहृदिविव्याधतिस्म ३२ तिष्ठेतिवदन्परःपुरुषोहृदया
न्निर्गतस्तस्य ३३ तस्यप्रबलस्यनिर्गच्छतःसतःश्रीचंडिकास्वनघत्सशहसंयथास्यात्तथाप्रहस्यप्रकर्षेणहसित्वासशब्दमट्टहासंकृत्वाखड्गेनशिर
श्छिच्छेदततोसौपुरुषोभुविपपात ३४

देवीटी० ततः शिरश्छेदनानंतरं सिंहस्तानसुरान् भक्षयन् उग्रदंष्ट्राभिः क्षुण्णाः संमर्दिताः शिरोधरा ग्रीवा येषां तान् तथा काली शिवदूती चापरान् जघान ३५ केचिन्म-
४८ हासुराः कौमारीशक्तिनिर्भिन्नाः संतो नाशं प्राप्तवंतः केचिद्ब्रह्माण्याः शक्तेर्मंत्रपूतेन तोयेन विध्वस्ताः संतो विनष्टाः ३६ माहेश्वर्यास्त्रिशूलेन भिन्ना
चूर्णीकृताः संतोऽपरे केचिद्वाराह्यास्तुंडघातेन चूर्णिता भुवि पतंति स्म ३७ वैष्णव्या शक्त्या ते केऽपि दानवाः खंडशः कृता ऐंद्रीहस्ताग्रविमुक्ते-

ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा काली शिवदूती तथापरान् ३५ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः ३६ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि ३७
खंडखंडं च चक्रेण वैष्णव्या दानवाः कृताः वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ३८ केचिद्विनेशुः पाताले केचिन्नष्टा महाहवात् ॥
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ३९ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये निशुंभवधो नाम नवमो-
ध्यायः ९

नान्ये तिलशः कृताः ३८ विनेशुः नष्टाः महाहवान्महासंग्रामात्पातालं नष्टा अपसृताः काल्यादिभिरपरे जीवंत एव भक्षिताः ३९ इ-
ति श्रीपरमहंसरामाश्रमविरचितायां देवीमाहात्म्यटीकायां नवमोऽध्यायः ॥ ॥छ॥ ॥

राम
४८

प्राणेनसहसम्पद्यतंतुलितंजीवसममित्यर्थः प्राणावासम्मतंप्रियंच भ्रातंरप्रियंच भ्रातरंनिशुंभंनिहतंदृष्ट्वाशुंभःक्रुद्धःसन्वचनमब्रवीत् १
बलेनयोवलेपोगर्वस्तस्मात्हेदुष्टेदुर्विनीते अन्यासांबलमाश्रित्ययातिमानिनीमहाहंकारवतीत्वंयुध्यसेमात्वंगर्वमावहमाकुरुस्वतोबलमभा
वादित्यर्थः युध्यसेचातिमानिनीतिपाठेतुहाहोहाहारैर्विनैवयोजना २ एकामजातीयस्वगतभेदहीनाअत्रजगतिममापरामातिरिक्ताद्वितीया
नकापीत्यर्थः केतिकिंशब्दआक्षेपे नत्वद्व्यतिरिक्तावन्यौब्रह्माण्याद्याः शक्तयइतिकथंमदपलापस्त्वयाशंक्याह अनुभूयमानस्यभेदस्यकाल्प

शुंभउवाच निशुंभंनिहतंदृष्ट्वाभ्रातरंप्राणसम्मितं हन्यमानंबलंचैवशुंभःक्रुद्धोब्रवीद्वचः १ बलावलेपाद्दुष्टेत्वंमादुर्गेगर्वमावह॥
अन्यासांबलमाश्रित्ययुध्यसेयातिमानिनी २ श्रीदेव्युवाच एकैवाहंजगत्यत्रद्वितीयाकाममापरा पश्यैतादुष्टमय्येवविशंत्यो
मद्विभूतयः ३ ततःसमस्तास्तादेव्योब्रह्माणीप्रमुखालयं तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदांबिका ४

निकाल्पनिकत्वेनास्युपपन्नेर्नवास्तवसिद्धिरित्याशयेनाह पश्यैतेति एताब्रह्माण्याद्यामद्विभूतयोममशक्तयः तंप्रतिमय्येवविशंत्यःसतीतिपश्य
त्वंवादितीयार्थेत्वंदसाद्यममामय्येवविशंतीःपश्यातोभेदस्यकल्पितत्वादेकैवाहमितिसिद्धं ३ ततोनंतरंताःसमस्ताब्रह्माणीप्रमुखालयं
शरीरेलयमाश्लेषंप्रत्यश्यात्तत्वंजग्मुरित्यन्वयः वपुषिलीनाबभूवुरित्यर्थः तदांबिकाएकैवासीत् ४

दे॰मा॰टी॰ आहोस्विज्जगति स्थाने वा स्वविभूत्या निजमहिम्ना बहुभी रूपैर्यदा स्थितावस्थानं प्राप्ता मया तत्सर्वं संहृतं अथाहमेकैव रणे तिष्ठामि त्वं
४९ स्थिरो भव ५ अनादरे षष्ठी पश्यतः सर्वदेवानसुरांश्चानादृत्येत्यर्थः ६ तयो रंबिकाशुंभयोर्वीरयोर्हि भिंदिपालि सौरप्रधैस्तथा दारुणै
रस्त्रैराग्नेयं वारुणं वायव्यं सार्पं गारुडं वैष्णवेनएव मस्त्रमस्त्रेण निघ्नतोस्तयोर्युद्धमभूद्यतो युद्धा
त्रिलोकलोका व्यथिताः ७ यानि दिव्यान्यस्त्राणि मुमोच तेषां प्रतीघातं कुर्वंति तानि तत्प्रतीघातकर्तॄणि तैः अस्त्रैरिति विभक्तिविपरिणा

देव्युवाच अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ५ ततः प्रववृते युद्धं देव्याः शुंभस्य
